कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. m 471 विषय पुराण
नांव सह्याद्रिखंड (उत्तर रहस्य) MSS
लेखक/लिपीकार —
पृष्ठ ५२
काळ — पूर्ण/~~अपूर्ण~~

Checked 2012

सिंह्याद्रिखंड उ[illegible]

से॰ष्या॰

१

श्रीगणेशायनमः॥ नैमिषे निमिषक्षेत्रे ऋषयः सत्रमासतः॥ शतसंवत्स
रं दीर्घं नानापक्षिविष्टसंकुलं॥ तत्रासनृषयः सर्वे दिव्या भौमाश्च नित्यशः॥
यज्ञनारायणं साक्षाद्यजंते देवैर्महर्षिभिः॥ २॥ वेदैश्च सवनैस्तोत्रैः शास्त्रै रस्त्रै
श्च संयुताः॥ मंत्रैरुक्तमंत्रिताः सर्वा देवता निवसंति हि॥ ३॥ त्रयाणामपि
लोकानामुत्सवः समभूत्तदा॥ इंद्राद्यो देवगणा देवाचार्य पुरोगमाः॥ ४॥
शौनकं मुनिशार्दूलं पुरस्कृत्य ययुस्तदा॥ नानागतान्समालोक्य ऋष
यः प्रश्रयान्विताः॥ ५॥ ऊचुस्तु परमप्रीत्या शौनकं चेदमब्रुवन्॥ अहो ध
न्यतमो लोके स एव पुरुषो महान्॥ ६॥ यस्यागमनमात्रेण सर्वे प्रमुदिता
जनाः॥ वयमत्र समासीनाः सत्रयागचिकीर्षया॥ ७॥ कर्मावसाने चास्मा
कं कालो नैवातिवर्त्तते॥ कथाभिः सुचरित्राभिः इतिहासैः पुरातनैः॥ ८

१

त्वन्नः सुखयितुं कालो महोसि पुरुषोत्तम ॥ इत्युक्तो मुनिशार्दूलः शौनकः करुणा
निधिः ॥९॥ द्वैपायनं पुरस्कृत्य वरमासनसंस्थित ॥ कथयामास विविधाः कथाः स
र्वमनोरमाः ॥१०॥ धर्मान्दिदेश श्रिनाम् कालयुगपर्वन संस्थितान् ॥ वर्णसांकर
जानांच कर्माण्युच्चावचान्यपि ॥११॥ एवं कथयतस्तत्र कालो बहुतिथो गतः ॥
कदाचिदागतस्तत्र ऋषिसंघसमावृतः ॥ जामदग्न्यो मुनिवरस्तपसा प्रज्वलन्नि
व ॥ तं दृष्ट्वा मुनयः सर्वे ज्वलंतमिव पावकं ॥१३॥ प्रत्युत्थाय त्रणे मुस्ते अर्घ्यह
स्ताः समुत्सुकाः ॥ अस्तुवन् जामदग्न्यं ते कृतासनपरिग्रहं ॥१४॥ त्वं राम जाम
दग्न्योऽसि ब्रह्मक्षत्रमुपाश्रितः ॥ क्षत्रियापसदां राज्ञां शिरश्छिछेद सत्वरं ॥१५॥
कार्तवीर्यस्य राजर्षेर्बाहुश्रेष्ठीं त्वं चकर्त्त ह ॥ भूमिं निःक्षत्रियां सर्वां पित्रोरर्थे च
कार ह ॥१६॥ त्रिःसप्तविप्रसाद्भूमिं कृत्वा शांतिमुपाश्रित ॥ साक्षात्कृतो भवान

सिं॰ह्या॰

॥२॥

यभूरिप्रभावतः ॥१७॥ धन्या वयमतः सर्वे धन्यं जन्म कुलं तपः ॥ इति स्तुत्वा मुनि
वराः पर्युपृष्टुर्मुदान्विताः ॥१८॥ लवणाब्धिस्तटे चास्मात् सिंह्याद्रिरभवद्यदा ॥
तत्र केस्थापिता विप्राः ये विद्याधर्मतत्पराः ॥ तव नामांकितं क्षेत्रमिषुपातसम
न्वितं ॥ तत्र लिंगान्यनेकानि क्षेत्राणि विविधानि च ॥२०॥ दाल्भ्याद्या ऋषयः सर्वे
कृतास्त्वत्क्षेत्रवासिनः ॥ त्वया संस्थापिता विप्रास्त्वं नाम्ना निवसंति हि ॥२१॥
अस्त्वल्पदानसंतुष्टाश्चित्तपूर्णा इति स्मृताः ॥ कथं त्वया मुकुः प्राप्ताः वैदिका
धिकृतास्तदा ॥२२॥ आर्यावर्त्तादागताश्च विप्रा आर्या इति स्मृताः ॥ त्रैविद्यां
सत्यसंकल्पांश्चोल स्मार्त्तक्रियापराः ॥२३॥ यमक्षादागता विप्रा यामव्गाः परि
कीर्त्तिताः ॥ अन्येपि देवराष्ट्रीया देवराष्ट्रादुपागताः ॥२४॥ मरुद्देशादा
गतायेमारवा इति विश्रुताः ॥ सारस्वतादागता ये कोंकणस्थाः प्रकीर्त्तिताः ॥

॥२॥

अथान्ये करहाटास्ते विंध्यदेशादुपागताः ॥ यद्यद्देशादागताश्च चोलपांड्यादितःस्तथा ॥
॥२६॥ ये चान्ये ब्राह्मणाः सर्वे कोंकणाधः प्रतिष्ठिताः ॥ निर्बाधास्सत्वसंपन्नाः सर्वधर्म
मुपाश्रिताः ॥२७॥ बाहूरुजाताः शूद्राश्च वर्णसंकरजास्तथा ॥ त्वत्क्षेत्रे च वसंतिस्मसु
खवासार्थमागताः ॥२८॥ त्वमनेनैव देहेन मुनिसंघसमन्वितः ॥ तेषां संरक्षणार्थाय
वससीत्यनुशुश्रुमः ॥२९॥ एवमादीनि ते रामचरितान्यद्भुतानि वै ॥ श्रुत्वानुस्मृत्य संकी
र्त्तितिष्ठामः सुचिरं मुने ॥३०॥ त्वयानिर्मितेक्षेत्रे तीर्थान्यायतनानि च ॥ मुनीनामाश्रमा
श्चैव क्षेत्राणि विविधानि च ॥३१॥ शिवलिंगानि यानीह विष्णुक्षेत्राणि सर्वतः ॥ गा
णापत्यानि सौराणि शाक्तानि विविधानि च ॥३२॥ सागरस्य च माहात्म्यं तत्र वासे च किं
फलं ॥ स्नानदानविधिं चैव तर्पणादिविधिं तथा ॥३३॥ × सद्यः प्रत्ययकारिणी गुह्या
नि विविधानि वै ॥ तेषां फलविधिं चैव माहात्म्यं वक्तुमर्हसि ॥३३॥ × ब्रूहि राम महा
भाग रेणुकेय नमोस्तु ते ॥ इति तेषां वचः श्रुत्वा जामदग्न्यो महामुनिः ॥३५॥ तपोनि

वि

धिं सुप्रसन्नं निकटस्थं महामुनिं ॥ शौनकं प्रेरयामास तीर्थमाहात्म्यकीर्त्तने ॥ २९ ॥ इति
स्कांदे महापुराणे उत्तरभागे सैंह्ये स्वायंभुवे प्रथमोध्यायः ॥ शौनक उवाच ॥ श्र
ण्वध्वमृषयः सर्वे नैमिषारण्यवासिनः ॥ शौनकोहं प्रवक्ष्यामि तत्कथामानुपूर्विकीं ॥
श्रोतॄणामनिशं चैव रम्यां विस्मयकारिणीं ॥ तत्क्षेत्रस्य माहात्म्यं श्रीरामचरितं तथा ॥ २ ॥
यदा युगांतसमये सर्वभूतपरिप्लुते ॥ विश्वं संहृत्य विश्वात्मा पय्या कूलमुपाश्रयत् ॥ ३ ॥
न सच्च तन्नासच्चैव व्यक्ताव्यक्ततमं महत् ॥ अणीयो नातिह्रस्वं च नातिदीर्घमगो
चरं ॥ ४ ॥ निरवच्छिन्नरूपं यत्तद्ब्रह्मेत्यभिधीयते ॥ समस्तसाक्षिचैतन्यमस्माच्च
सदजायत ॥ ५ ॥ अनंतबाहूरुपदमनंतोदरशीर्षकं ॥ द्यावाभूमिं समावृत्य ति
ष्ठत्येकः सनातनः ॥ ६ ॥ परापराभिर्विद्याभिः प्रणीतैः क्रतुभिः सह ॥ असृज्जत्सक
लं विश्वं स्वस्याऽवयवसंभवं ॥ ७ ॥ मुखबाहूरुपद्भ्यश्च जाता ये ब्राह्मणादयः ॥

ब्राह्मणो भगवान्रुद्रः क्षत्रियो मधुसूदनः ॥ ७ ॥ वैश्यस्तु द्रुहिणो विप्राः शूद्रौंस्ताकशास

नः ॥ वर्णाश्रमविभागस्तु नत्तं दैशोत्राभेदतः ॥ ८ ॥ जातिभेदो दशभेदाः पुष्पाभिर्बहुधा

श्रुता ॥ ९ ॥ लोमहर्षसुखात्सार्वं पुराविस्तरशो मुरुः ॥ १० ॥ इदानीं श्रोतुकामांश्च मुनिव

र्यान्समासतः ॥ रामायाशिरसाध्यत्वा कथयामि कथामिमां ॥ ११ ॥ यदा विंध्याच

चलोन्नत्या पीडिता विबुधा दिवि ॥ आनंदकाननं प्राप्य ददृशुर्वरमाश्रमं ॥ १२ ॥ कल्प

चोद्भवस्येस्तु च्छायं नानावृक्षसमन्वितं ॥ खगपक्षिगणाकीर्णं लतागारामसंयुतं ॥

अन्योन्यविद्विषैस्त्यक्तं मृगव्याघ्रादिसंकुलं ॥ स्वाध्यायनिरतैरंतेवासिभिरूपशो

भितं ॥ १४ ॥ तत्रागत्य मुनिं लोपामुद्रपासेवितं तदा ॥ दृष्ट्वानमेचु दृशनार्त्ता स्तुतिं च

क्रुःसुविस्तरं ॥ १५ ॥ देवाः ॥ नमस्ते मुनिशार्दूल ब्रह्मनिष्ठ तपोनिधे ॥ नमस्ते त्रिजगद्वं

घ नमस्ते वीतकल्मष ॥ १६ ॥ नमस्ते योगिनां वंद्य कुंभयोने नमोस्तुते ॥ दीनानामार्त्ति

त्र्वमेवैकस्त्रापोपकृतिनां वर ॥ १७ ॥ इति संप्रार्थित मुनिः देववृंदानिषेवितः ॥

भ

सिं॰ष्या॰ इंद्रादीन् विबुधान्वाचं मैत्रावरुणिरब्रवीत्॥ अगस्त्य उवाच॥ गंगा पापं शशी तापं दैन्यं
कल्पतरुस्तथा॥ पापं तापं च दैन्यं च सद्यः साधुसमागमः॥१९॥ भवादृशानां साधूनां
॥५॥ गोचरात्कुलमद्य वै॥ श्रुतं शीलं तथा जन्म सर्वं सुमुखतां भवेत्॥२०॥ इत्युक्त्वा स मुनिः
प्रादात्तेभ्यो मण्डलविष्टरान्॥ स्याद्वन्नैरस्त संपूर्णैः भक्ष्यैर्भोज्यैश्च षाड्विधैः॥२१॥ नाना
विधोपचारैश्च तर्पयित्वागतश्रमान्॥ पर्यपृच्छत्तपोनिष्ठः कुशलं स्वच्छदायकं॥२२॥
किमर्थमागता यूयं हृदिस्थं ब्रूत कारणं॥ इति पीत्वा कर्णरंध्रैर्मौनीं सुधामिव॥२३॥ वाक्य
तद्गौरवमनुध्यात्वा प्रतिक्षणमेनस्तकाः॥ आचख्युस्तं मुनिं प्रीत्या स्वार्थबुद्धिप्लुतस्वराः॥
प देवा ऊचुः॥ स्वामिन्नुन्नतिः कार्यास्विपा ब्रह्मर्षिणाधुना॥ दक्षिणाशां समागच्छ यत्र
विंध्यस्य चोन्नतिं॥२५॥ दमयस्व महाभाग कृपां कुरु तपोनिधे॥ त्वया विना नोपरामं ॥५॥
स याति धरत्रीखरः॥२६॥ अस्मान्निर्याहि भो स्वामिन् पीडितानुद्धरस्मुच्च॥ इत्यादी
नि निशाम्योच्चैर्वचस्तेषां मुनीश्वराः॥२७॥ गंगायमुनयोर्मध्ये ये वसंत्यग्रजाः प

याः ।। आर्यावर्तोद्भवैः साकं निरगाद्दित्वलापहृत् ।। महेंद्रो मलयः सिंहो शुक्तिमानृक्षपर्वताः ।। २९ ।।
एतेषु पर्वतीयेषु देशेषु नगरेषु च ।। यत्र यत्र स्थले यांति तत्र तत्र च भूसुरान् ।। ३० ।। स्थापयित्वा
नतस्तत्तन्नाम्नैव क्रियया याचवे ।। ये देशेषु च ये जातास्तेषां नाम तदाभवत् ।। ३१ ।। एवं सर्वा
न्विनिक्षिप्य विंध्यगर्वं निरस्य च ।। दक्षिणाशां समागच्छत्य तत्रैव वसति स्म ह ।। ३२ ।। औदि
च्या दाक्षिणात्याश्च द्विधाभूताश्च ये द्विजाः ।। आद्याः पंचविधाः प्रोक्ताः कान्यकुब्जाश्च दिभे
दतः ।। ३३ ।। कान्यकुब्जा मैथिल्याश्च गौडा सारस्वतास्तथा ।। उँत्कलाश्चेति विज्ञेयास्त्वय
माः द्विजपुंगवाः ।। ३४ ।। दाक्षिणात्यास्तथा प्रोक्ता द्राविडादितिभेदतः ।। द्राविडाः गुर्जराः आ
र्याः आंध्राः कर्णाटकास्तथा ।। एते प्रधानदेशीया अंतर्देशो भवाः परे ।। तत्तन्नाम्नैव वि
ख्यातास्तत्तद्देशे स्थिता द्विजाः ।। विंध्यस्य चोत्तरे देशे मांसाशी ब्राह्मणो भवेत् ।। विंध्यस्य
दक्षिणे भागे मांसभुक् पतितो भवेत् ।। एवं देशविभागेन स्थापिता ब्राह्मणोत्तमाः ।। स
ह्यपुत्रैर्भयाःपन्नाः सत्वधर्मप्रतिष्ठिताः ।। ३५ ।। इति स्कांदे सिंहाद्रिखंडे द्वितीयोध्यायः ।।

ऋषय उवाच ॥ भार्गवो जामदग्न्यस्तु सर्वक्षत्रकुलांतकः ॥ विनश्योदधिदर्पं तु स्वक्षेत्रं निर्मितं
तदा ॥ कोंकणाधः प्रदेशो तु तत्कियत्परिमाणकं ॥ समुद्रचलनात्तत्र सप्तखंडा विनिर्मिताः ॥२॥
तत्तत्खंडे च तत्क्षेत्रे तेन के स्थापिता द्विजाः ॥ कानि तीर्थानि तत्रस्ते वदास्मान्मुनिपुंगव ॥३॥
इत्याकर्ण्य वचस्तेषां मुनीनां भावितात्मनां ॥ उवाच वचनं श्री साशोनकः सर्वधर्मवित् ॥४॥
शौनक उवाच ॥ शृण्वंतु ऋषयः सर्वे सावधानपुरःसरं ॥ यल्लीलानटनेनैव विस्मितं भुव
नं तदा ॥५॥ जामदग्न्यो मुनिवरः स रामः सुप्रतापवान् ॥ राजर्षेः कृतवीर्यस्य सुतं हत्वार्जु
नं ततः ॥ त्रिसप्तधा च निःक्षत्रं कृत्वा रोषान्वितो मुहुः ॥ मनसा व्याकुलीभूत्वा दोषापसर
णार्थवित् ॥७॥ गंगादितीर्थसंघृष्टकमंडल्वोदकेन तु ॥ विधिपूर्वं समर्पिंधुवलया कृत्स्नंभुवं
न तः ॥८॥ चिंतयन्भूसुराणां वै कश्यपाय गरीयसे ॥ तस्मै दत्वा मुदं लेभे सुरासुरनि
बर्हणः ॥९॥ ततो मुनिवरो योसौ पुत्रपोत्रादिकांस्त[illegible]था ॥ शिष्यांश्चान्यान्द्विजवरा

न् यथाभागं चकार तां ॥१०॥ क्षित्याधिपत्यं ग्रामाये ब्राह्मणामदविकल्मा:॥ अनेकवित्तसंप
न्ना धर्मैर्जगदपालयत् ॥११॥ कदाचिन्मिलिता: सर्वे पयुर्भृगुसुताऽश्रमं ॥ दृष्ट्वा ताननर्घ्य
पाद्यादिपूजां कृत्वा प्रयत्नत:॥१२॥ दत्त्वा वरासनं तेभ्यो ह्यागतान् सोप्यपृच्छत ॥ किमर्थमा
गता यूयं कारणं ब्रूत पृच्छत:॥ रामस्य चैवेनं श्रुत्वा प्रोचुस्ते ऋषिसत्तमा:॥ स्वामिन्न्यानि का
र्याणि न संति यदिच्चागता:॥१४॥ दिदृक्षव: स्वलोकं च विहृतुं त्वस्समीपत:॥ अस्मभ्यं च
त्वया दत्ता धरेयं विबुधाधिप ॥१५॥ परदत्तां गृहीतुं च विधिर्नोक्त: श्रुतादिभि:॥ धर्मज्ञे
न त्वयाज्ञा चादत्ता भू: स्पृश्यते कथं ॥ पादपांसुप्रसंगेन दत्तप्रहरणं भवेत् ॥ एतेषां कैन
वीवाणीं श्रुत्वा वै भृगुनंदन:॥१७॥ क्रोधाग्निनाभिसंतप्त: पारुष्यगिरमब्रवीत् ॥ म्लेच्छा
न्निषादाभिल्लाश्च हीनवर्णधमादय ॥ नेसर्वे पतिता भ्रात्या: शास्यं त्वं वसुधामिमां ॥
भवता याच्च कृत्वं हि प्रतिग्रहमवाप्स्यसि ॥१८॥ ऐश्वर्यमोहमादसंपात्वा सततमाद
रात् ॥ उन्मादयुक्तो बाहुल्ये लु[illegible]तां वृत्तिमास्थिता:॥ धर्माधर्मविभागेषु परिभ्रष्टाभवं

लि

तुवै ॥ अन्यायवर्त्तिनः केचिद्दंभलोभादिसंयुताः ॥ २१ ॥ शापावसानसमये भीताः शर
णमाययुः ॥ अच्छंदर्यंत कतिचित् दैन्ययुक्ताः पुनस्तदा ॥ २२ ॥ तानागतां सात्विको
श्चनिष्कामाननुरूपकान् ॥ दृष्ट्वा कृपालुर्भगवान् शांतिमापजलोक्षवत् ॥ २३ ॥ ततः
प्रोवाचमधुरं श्लक्ष्णगंभीरयागिरा ॥ ज्ञात्वा मम प्रभावंच भक्त्वाचानुदिनं तथा ॥ २४ ॥
त्यक्तमात्सर्यमोहारास्तेषां प्राप्नोति शाश्वतं ॥ त्रयीधर्माखिलाचारे निष्ठतास्तपो
धनाः ॥ २५ ॥ इत्युक्त्वा निर्गतो रामः सिंधुदक्षिणतीरतः ॥ कल्हारक्षेत्रमासाद्य निर्मा
यच सरोवरं ॥ २६ ॥ रम्यं सुशीतलच्छायं रचितेश्मनीलकं ॥ अरविंदरजोभिश्च
परागितपरागकं ॥ तत्र स्नात्वा यथापूर्वमुपाविश्य कुशासने ॥ अंगानि भस्मनो
द्धूल्य धृत्वा चैव त्रिपुंड्रकं ॥ २८ ॥ रुद्राक्षाऽलंकृततनुः हृष्टचित्तस्तदा रघीः ॥ पी
वाक्षरजपासक्तो जटापटलशोभितः ॥ २९ ॥ प्रासादं कारयामास स्वर्णप्राका

रसंपुतं ॥ सहस्रस्तंभसंवीतं रत्नरंजितगोपुरं ॥ ३० ॥ तत्र स्वनाम्नाभिख्यातं लिंगमे
कमनुत्तमं ॥ स्थापयित्वा रत्नमयँमकरोत्पूजनं मुदा ॥ ३१ ॥ नानाविधोपचारैश्च दि
दिव्यैः पुष्पैः सुशोभनैः ॥ बिल्वैश्च कोमलैर्धूपैर्दीपैः कर्पूरसंभवैः ॥ ३२ इत्यादिभिः पूजयित्वा
प्रतिक्षणमनन्यभाक् ॥ साष्टांगं प्रणिपत्याथ समाधिमगमत्तथा ॥ तद्भक्त्यातीवसं
तुष्टः सांबः संसारमोचकः ॥ तस्मिल्लिंगे प्रादुरासीत्पिनाकी वृषभध्वजः ॥ ३४ ॥ देवा
श्चदुंदुभीन्नेदुः पुष्पवृष्टिरभून्मुहुः ॥ ननृतुश्चाप्सरोवृंदाः निनादः सुमहानभूत्त ॥ ३५ ॥
समाधिं च विसृज्याथ दृष्टी उन्मील्य भार्गवः ॥ रामो मुनिवरस्तोतुं तं दृष्ट्वा च प्रचक्रमे ॥
राम उवाच ॥ नमस्ते देवदेवाय नमस्ते प्रमथाधिप ॥ नमस्ते भूतनाथाय विश्वरूपाय
ते नमः ॥ ३७ ॥ नमस्ते पुंडरीकाक्ष नेत्रार्चितपदांबुज ॥ त्रयीमयाय चंद्रार्धजटापट
लरोचिषे ॥ ३८ ॥ कोटिसूर्यप्रतीकाश प्रभापूरितदिङ्मुख ॥ नमस्ते स्कंदमहोद

व पशूनां पतये नमः॥ उग्रायोग्राघनाशाय सदाशिव नमोस्तु ते॥ विश्वेश्वर विरूपा
क्षत्र्यंकराय नमो नमः॥४०॥ उमालिंगितवामांग नमस्ते भक्तवत्सल॥ कल्याणरू
पिणे तुभ्यं सर्वाभीष्टफलप्रद॥४१॥ नमस्ते मृत्युरूपाय नमस्ते मृत्युनाशक॥
नमस्ते नीलकंठाय नमस्ते मदनांतक॥४२॥ नमस्ते लोकगुरवे कैलासाधिप
ते नमः॥ नमस्ते ब्रह्मरूपाय विष्णुरुद्रेंद्ररूपिणे॥ नमस्ते सर्वरूपाय रूपातीता
यते नमः॥ भवाय भवनाशाय नमस्ते परमात्मने॥४३॥ इति स्तुत्वा महादेवं ननां
म च मुकुमृकुः॥ स्वरूपं तव विज्ञातुं शक्यमेव न संशयः॥४४॥ वेदैरपि न विज्ञातुं
मया ज्ञेयं कथं विभो॥ स्तोत्रेणानेन संतुष्टो भगवान्पार्वतीपतिः॥ उवाच वच
नं प्रीत्या भार्गवं मुनिसत्तमं॥ मनोभिलषितं यद्य दूरं वरय सुव्रत॥४६॥ इत्याकर्ण्य
वचः श्रीमान् जामदग्न्यः प्रतापवान्॥ कृतांजुलिपुटो भक्त्या प्रणम्य च सदा

शिवे ॥४८॥ प्रार्थयामास तद्भक्तिं शिवैकशरणः सदा ॥ देहि मे तव पादाब्जे भक्तिमव्य
भिचारिणीं ॥४९॥ संप्रार्थितस्तु विश्वात्मा स्तथास्त्विति स वदत्पुनः ॥ यच्छस्यपो जना
सक्तस्त्वं तदा प्राप्स्यसे मुदा ॥५०॥ इति दत्वा वरान्देवस्तत्रैवांतरधीयत ॥ श्रीमान्
लब्धवरश्चैव हृष्टचित्तस्तदाभवत् ॥५१॥ इति स्कांदे सिंह्याद्रिखंडे तृतीयोध्यायः ॥
ऋषय उवाच ॥ ततस्तु रामो भगवान्लीलामानुषविग्रहः ॥ किंचकार तदा चक्ष्व
पृच्छतां नो तपोधनः ॥१॥ शौनक उवाच ॥ एवं तु मुनयः सर्वे सर्वदेवनिषेवितः ॥
सर्वज्ञः परमात्मा च योगैश्वर्यसमन्वितः ॥२॥ सागरांतिकमागत्य स्तुतिं कृत्वा सुभा
गविः ॥ सागरं प्रार्थयामास मेदिनीं देहि मे विभो ॥३॥ भार्गव ॥ महोदधे महोदार सर्व
सत्वालय प्रभो ॥ नदीनां सरसां चैव पुष्करीणां च सर्वशः ॥४॥ निर्झराणां च स
र्वेषां त्वमेवैकायनं महत् ॥ मैनाकप्रमुखाः सर्वे गिरयस्त्वां समाश्रिताः ॥५॥ अन्ये

देवाश्च दैत्याश्च कालखंजादयस्तथा ॥ सर्वेषां राक्षसानां च भूतानामाश्रयोसि भो ॥६॥ त्वमेव
शरणं प्राप्तो विष्णोस्त्वं शरणं महत् ॥ मया प्रसादादृश्च त्वा सर्वभूविप्रसाद्धृता ॥७॥ तत्र
नाहं गमिष्यामि अतस्त्वं याचयामि भो ॥ वासार्थं मेदिनी देयो हि मठमात्रस्य मे प्रभो ॥
इत्येवमादिकरूपैर्वचनैः स प्रबोधितः ॥ सागरः प्रकटीभूत्वा प्रणाम्य मुनिसत्तमं ॥९॥
सागर उवाच ॥ मेदिनीं न प्रदास्यामि विभो राज्ञां नलंघये ॥ स्थापिताः सागराः सर्वे विष्णु
ना प्रभुविष्णुना ॥१०॥ रेखामात्रं परित्यक्तुं लंघितुं वा न च क्षमः ॥ अदेयं यश्च गृह्णाति
यश्चादेयं प्रयच्छति ॥ तावुभौ महतामुच्चैः पापिनाविति नश्रुतं ॥ तस्मात्त्वं मुनिशार्दू
ल गच्छ वा तिष्ठ वा सुखं ॥१२॥ अतस्त्वं स्वदर्थं वसुधां मया दातुं न शक्यते ॥ इत्युक्त्वा
जलधिः सद्यस्तत्रैवांतरधीयत ॥१३॥ क्रुधस्ततोसौ पुरुषप्रवीरो युगांतकालोत्थित ॥८॥
समं चिप्रुं वै ॥ चिक्षेप रत्नाकरशोषणाय तेत्रेषुपातप्रबभूव नाथं ॥१४॥ स्मृत्वा

पाशुपतं चास्त्रं रौद्रं कालाग्निसुप्रभं ॥ विन्यस्य चारयोः शाल्ये धनुपस्पर्शसत्व
रं ॥१५॥ त्र्यंबके पादमेकं च हरीशस्य च मूर्द्धनि ॥ द्वितीयपादमारुह्य विच
कर्षमहद्धनुः ॥१६॥ ततो धनुःकर्षणनादभिन्नो मेरुस्तथान्ये गिरयश्च मे
दिनी ॥ चचाल सर्वा स्फुटितैव तैः समं महोदधेः संशयमापतत्क्षणात् ॥१७॥
तं निनादमुपाश्रित्य सदेवासुरमानुषं ॥ बभूव चकितं सर्वमकस्मात्किंप्र
वर्त्तते ॥१८॥ ततस्तेनिसृतो बाणो पतितो लवणार्णवे ॥ ज्वालामालासह
स्त्रौघैः कल्पांतदहनोपमो ॥१९॥ ताभ्यां समुत्थितो वन्हिः प्रददाह महोदधिं ॥
तत्पावृत्तज्जलं सर्वमकस्माद्भस्मसात्कृतं ॥२०॥ ततो हाहाकृतं सर्वं सदेवासु
नु रमानुषं ॥ ब्रह्माद्या देवताः सर्वाः परं विस्मयमागताः ॥२१॥ ततो देवाः समाग
त्य रामं शस्त्रभृतां वरं ॥ प्रणेमुः शिरसा भूमौ स्पृष्ट्वा स्पृष्ट्वा पुनः पुनः ॥२२॥
देवा ऊचुः ॥ नमस्ते मुनिशार्दूल रेणुकेय महाबल ॥ त्वयायं विध्वलो लोकः

लो

सदेवासुरमानुषः ॥ २३ ॥ तस्मात्त्वं विप्रशार्दूल बाणं संहर संहर ॥ सागरेनि
हितं स्तूर्णं लोकः सर्वो विनश्यति ॥ २४ ॥ सागराज्जायते वृष्टिस्ततो धान्यं ततो
मखः ॥ नृस्यान्योषधयः सर्वा वृद्ध्यायंतानि सर्वदा ॥ समस्तजीवलोकायं देवलोक
स्तथापरे ॥ २५ ॥ वृष्टिमेवाभिकांक्षंति सा वृष्टिः सागरानुगा ॥ २६ ॥ त्वमादिपुरु
षः साक्षान्मायामानुषविग्रहः ॥ ब्राह्मणाभ्यर्थितं पूर्वमवतीर्णोसि भूतले ॥
कार्त्तवीर्यवधार्थाय हैहयानां तथैव च ॥ भूमेर्भारावतारय साधूनां पाल
नाय च ॥ २७ ॥ विपरीतमिदं प्राप्तं त्रैलोक्यक्षयकारकं ॥ क्रोधं संहर देवेश
त्रैलोक्यं परिपालय ॥ २९ ॥ जंबुद्वीपादयो द्वीपाः सागराल्लवणोदधेः ॥ त्वयैव
स्थापिताः पूर्वं कस्मात्त्वं संहरिष्यसि ॥ ३० ॥ कृतापराधया योयं सागरः पयसां
निधिः ॥ स्त्वेनैव कर्मणा दग्धा स्त्वमेनं क्षंतुमर्हसि ॥ ३१ ॥ प्रांजलिः प्रणतो ह्येषः
प्राकुस्त्वां संप्रतीक्षते ॥ अनुकंपय देवेश अस्त्रं संहर संहर ॥ ३२ ॥ सागरः ॥

कृष्णेन भाषितं पूर्वं ब्राह्मणा मामकी तनुः ॥ मान्याः सर्वत्र पूज्यास्ते नावमान्याः कदाचन ॥ ३३ ॥
मया मूढतमेनाद्य ब्राह्मं तेजस्तिरस्कृतं ॥ गछ चातिष्ठ वेत्युक्तं यां चाले विफलीकृता ॥ ३४ ॥
अपराधसहस्राणि कृतवानस्मि मंदधीः ॥ तेषां दंडो मया प्राप्तः क्षंतव्यश्चाधुना विभो ॥ ३५ ॥
पावको मां दहत्येष रोषास्त्रेण प्रवर्त्तितः ॥ नैव सोढुं समर्थोस्मि त्यक्ष्ये प्राणानहं विभो ॥ ३६ ॥
विलपंतमतीवोच्चैः सागरं पतितं भुवि ॥ रेणुकेयस्तु तं दृष्ट्वा कृपयाक्लिन्नमानसः ॥ अ
स्त्रं संहृतवान्नास्तु मा भैस्त्वमिति चाब्रवीत् ॥ मया संचालितः सिंह्याद्वापोश्चानुदक्षौरि
हा ॥ ३८ ॥ द्विषड्योजनविस्तीर्णं चतुराशीतिमायतं ॥ इक्षुपानां क्षितं क्षेत्रं क्षुराकारं भवि
ष्यति ॥ ३९ ॥ इदं क्षेत्रं त्वया सिंधो रेखामात्रमपि क्वचित् ॥ प्रलयेपि न चोल्लंघ्यं वातव्या
घूर्णनेन च ॥ ४० ॥ मया संप्रेषिता बाणाः शिवरूपास्तवांतिके ॥ प्रतिष्ठिता भविष्यंति तान्
भजस्व निरंतरं ॥ ४१ ॥ मर्यादावल्लयं चेतन गृहाण पयसांनिधे ॥ स्वतीरे स्थापयामाशु [illegible]
नैतल्लंघितुमर्हसि ॥ ४२ ॥ येत्रापाब्राह्मणाः पूर्वं दत्तास्ते पयसांनिधे ॥ ते सर्वे निर्भ
विष्यंति चतुराशीति योजने ॥ ४३ ॥ यत्क्षेत्रवासिभिः सर्वैरन्यैर्देशांतरागतैः ॥ संसे

व्यः सर्वदा सिंधोस्नानपानावगाहनैः ॥४४॥ यत्र या संकरिष्यंति वर्णाः संकरजातयः ।
मुक्ता एव भविष्यंति मत्प्रसादान्न संशयः ॥४५॥ गच्छ सागर भद्रं ते मम पातु ह्यापितः
सुखं ॥ महोदधे महाभाग विषादं माकरिष्यसि ॥४६॥ तस्याज्ञां शिरसा वंद्य प्रणिप
त्य पुनः पुनः ॥ पुनः प्रदक्षिणीकृत्य सागरः प्रययौ सुखं ॥४७॥ इति स्कांदे० चतु
र्थोध्यायः ॥ ऋषय उवाच ॥ तपोनिधिर्जामदग्न्यो रामः शस्त्रभृतां वरः ॥ यथा का
लाग्नि रुद्रश्च युगांतप्रलये खिलान् ॥१॥ लोकान्दहन्स्तेनैव दाहदहनश्च तथाप
रः ॥ यस्य क्रोधाग्निना लोको भस्मसाद्भवतीक्षण ॥२॥ एकेनैव तु बाणेन तथा
पाशुपतेन च ॥ कृतांतः प्रपंचो दग्धश्चेत्किमर्थं प्रेषितास्तथा ॥३॥ चतुर्दशाश्रुग
स्तीक्ष्णा अप्रभूतीर्णवोपरि ॥ ब्रूहि त्वं श्रोतुकामानामिदं विस्मयकारकं ॥४॥
शौनक उवाच ॥ साधु पृष्टं महाभागाः शृणुध्वं सावधानतः ॥ गाथामिमां
प्रवक्ष्यामि महाविशादपूर्विकां ॥५॥ यदा विनिर्गतो रामः कल्हारादाज्ञया
गुरोः ॥ महादेवस्य तेनैव प्रार्थितोंबुपतिस्तदा ॥६॥ आश्रमार्थं मम स्थ

नंदेही निस्त्रुतनात्सुनः ॥ मदेन गर्वितश्चायं पारुष्यमं वदद्वचः ॥७॥ ममरे खोल्लं घनेन विभो
राज्ञा गरीयसि ॥ रक्षणीया हिते राम किमर्थं साध्यमत्रच ॥८॥ इति तद्वचनं श्रुत्वा ॥ निष्ठवा
बायाहिते राम किमर्थं साध्यमत्रच ॥ इति तद्वचनं श्रुत्वा हृदिशल्यमिवापितं ॥९॥ कल्पां
तभैरवापन्नप्रलयांतकरौद्रवत् ॥ क्रोधानलोर्म्मिभिरन्नेत्रः पुनः प्रस्फुरिताधरः ॥१०॥
दिशाश्च कंपयन्नेव चालयन्वसुधामिमां ॥ शीघ्रमुत्थाय संहर्त्ता प्रयाणाभिमुखो भ
वत् ॥११॥ सिंधुस्तद्दानीं संत्रस्तः स्मृत्वा मोहं पुनः पुनः ॥ विनिर्गतमदः स्तब्ध्वात्र त्राणं श
रणं ययौ ॥१२॥ तमब्धिमागतं दृष्ट्वा ह्यब्रवीत्कमलासनः ॥ किं कार्यं वद सिंधो त्वं न क्षोभं
करवाण्यहं ॥१३॥ त्वद्विशालोदरे मध्ये स्थापिता गिरिपत्रिणः ॥ दावाग्निश्च हरिश्चैव वाव
बुधानां द्विषस्तथा ॥१४॥ रत्नानामाकरश्चैव भूतानामाश्रयः पुनः ॥ विश्वेश्वरप्रसादा
च्चसंपत्प्राप्तचतस्तव ॥१५॥ परोपकारिणश्चापि दुरितं च किमद्य वे ॥ ब्रूहि सागरत
त्सर्वं परिदृष्टवतो यतः ॥१६॥ सागरः ॥ ब्रह्मणो वचनं श्रुत्वा सरित्पतिरुदारधीः ॥ उ
वाच वचनं प्रीत्या श्लक्ष्णं गंभीरया गिरा ॥१७॥ त्वद्दतेन्मा.न कर्त्तारं नान्यं जाने पिता

मह॥सर्वज्ञोसिमहाभाग सर्वकारणकारणं॥१८॥मत्तराभ्यासमागत्य भार्गवोमुनिसेवि
तः॥निर्विण्णचित्तोभूमिंच मठार्थंयाचते स्मह॥१९॥मयामायामोहितेन यच्चोक्तंपुरुषं
तदा॥तस्माभावानवज्ञेनतत्क्षणुघाधुनापुनः॥२०॥तद्दूभोराज्ञयाचेवममानक्रियते
मुने॥रेखोल्लंघनकंत्वंहिगच्छवातिछवाधुनः॥२१॥इत्यवज्ञावचांमांच नस्यक्रोधूदया
ग्नितः॥पाहिब्रह्मन्लोकगुरो सर्वभूतहितेरतः॥२२॥अज्ञयोनिस्कृतद्वाक्यंश्रुत्वोवा
चैहितंतदा॥मयापिविछुनाचापिरुद्रेणचसरिस्पते॥२३॥निवारितुंनशक्योसो
कःसमर्थोजिगत्त्रये॥अतस्त्वंयाहिनिकटेनारदस्यमहात्मनः॥२४॥अस्योपायांतरं
चैववक्ष्यति त्वांयथासुखं॥इतितद्वचनंश्रुत्वा पुनर्नत्वासरित्पतिः॥२५॥आज्ञां
शिरसिसंवाह्यतदंतिकमुपागमत्॥स्ववृत्तांतंयथापूर्वंकथयित्वाभयार्दितः॥२६॥
तपोनिधिंविशालाक्षंजटापटलशोभितं॥महतींसंवादयंतंमोहितंत्रिजगत्त्रया॥
भस्मावगुंठिततनुंस्फुरत्कुंदेंदुसन्निभं॥एणाजिनपरीधानंसिध्दगंधर्वसेवि

तं ॥२८॥ योगैश्वर्यसमायुक्तं शांतं विततनिस्पृहं ॥ नारदं प्रार्थयामास स्वस्यात्मुनि
हिते रतः ॥२९॥ सागरः ॥ सुरासुरैर्वंदितांघ्रे भाषितासन्नकल्मष ॥ त्रिकालदर्शिदिव
र्षिप्रवरः सर्ववित्तथा ॥३०॥ सर्वत्र समचित्तस्त्वमस्माकं दुरितोघनुत् ॥ गतिर्भव ब्र
ह्मसूनो केवलोह्यात्मन संविद ॥३१॥ इत्येवं प्रार्थितः श्रीमान् नारदः करुणाकरः ॥ पप्र
च्छ सिंधुराजं तं किमस्तीति वद प्रभो ॥३२॥ पृष्टः श्रीमुनिवर्येण समुद्रः पुनरब्रवीत् ॥ सा
गरः ॥ दत्तमह्यां स्ववासश्वरो चतेन कदाचन ॥३३॥ मनस्येवं समाधाय ऋषिभिर्मद्विव
क्लैः ॥ क्षोभितश्च भवाक्यैश्च क्षुक्षोभत्कुटिलेक्षणैः ॥३४॥ मदंतिकं समागत्य यदा
ह्यभिमयाचत ॥ तदाहं न ददौ पृथ्वीं वासार्थं मदविह्वलः ॥३५॥ सोपि श्रीमान्भार्गवश्च
तर्जयित्वाच मां गतः ॥ तद्भीतिवज्रपातेन प्रहतोस्मि सुरर्षिभिः ॥३६॥ त्वत्समीपमत
श्चाहं प्राप्तवान् द्रुहिणाज्ञया ॥ उपायं वक्तुमर्होसि ममापद्विनिवारणे ॥३७॥ इति
तद्वचनं श्रुत्वा नारदः प्रत्युवाच ह ॥ नारदः ॥ रे मूढ सिंधो भ्रांतस्त्वं केवलं जडनाम
यः ॥३८॥ तत्प्रभावं न जानासि स्वैश्वर्यमदगर्वितः ॥ पारुष्यमूचिवान्यत्तद्दूररूपं

तवाभवत् ॥३९॥ श्रायशोमनिसंभाविबाह्यांतर्दाहहृच्छ्न्वेन्न ॥ अनुद्वेगकरं वाक्यं परेषां च
हितावहं ॥४०॥ सर्वदा भूतिकामैस्तु प्रवक्तव्यं बुधः प्रियं ॥ जिह्वाग्रे यस्य मधुरा सर्वेषां
प्रियदायिनी ॥४१॥ सुधावृष्ट्यासमायुक्ता सततं गीः प्रियंवदा ॥ वर्त्तते सा नरः साक्षा
ल्लोकत्रयनुतो भवत् ॥४२॥ तत्रापि रामः श्रीमांश्च तपस्वी योगिनां वरः ॥ साधुश्च पुण्य
वान्लोके दयालुर्गतकल्मषः ॥४३॥ सर्वतंत्रस्वभावात्मा वीतरागो जितेंद्रियः ॥ ब
ता णिश्रमान् पालयित्वा सर्वधर्मार्थकोविदः ॥४४॥ धर्मस्थापनकर्त्ता च बलवान्क्षत्र
नाशकः ॥ सधर्मघ्नान्नाशयिता यशःसंवर्धनप्रियः ॥४५॥ एतादृश्यस्य रामस्य क
थयीमाज्ञासमुज्झिता ॥ मायामयेऽस्मिन् जगति प्रविष्टेनांतरागस्ता ॥४६॥ यस्येश्व
री महामाया दुरूहा चदुरत्यया ॥ ययाद्वैतमिवाभाति जगत्स्थावरजंगमं ॥४७॥
ब्रह्मविष्ण्वादिदेवानां महामोहानुयायिनां ॥ तेषां तन्निस्तारणे च शक्तिश्चापि वि
कुंठिता ॥४८॥ मादृशानां तु बाकुल्यं भवेत्केसुगमं कं तथा ॥ ज्ञप्तिमात्रेण संसिद्धि
र्भवेत्सेवात्मे वे तृणां ॥४९॥ तस्मात्सर्वप्रयत्नेन निर्मोहादीश्वसाधयेत् ॥ निरहं

कारनिर्लोभिपरोपकृतिसाधनात् ॥५०॥ एवमादिगुणाश्चैव बहवः संप्रकीर्तिताः ॥ पुरा
मुनिवराश्चैवं साधुभिस्तत्वदर्शिभिः ॥५१॥ देवानां कार्यसिध्यर्थं दधीचिस्तु महामु
निः ॥ स्वशरीरं ददौ तेभ्यःस्तु क पालु मुनिसत्तमः ॥५२॥ कुंभयोनिस्तदर्थं च दक्षिणा
शांस्थितः सदा ॥ इत्यादयोपिमुनयस्तथान्ये राजसत्तमाः ॥५३॥ तरवो वारिदाश्चैव
तथान्ये महीधरादयः ॥ सर्वेतिसस्तथाः संतः परोपकृतितत्पराः ॥५४॥ अतस्त्वदुदरेसे
ति बहवो जंतवः सदा ॥ नीचो नीचतरो यो वापि समर्थो नालवानपि ॥५५॥ मूर्खो वा
पंडितो वापि लघुश्चैव महानपि ॥ सर्वदा भूतिकामेन नोपेक्ष्याश्च सरित्पते ॥५६॥
यदा पत्नी टिट्टिभाख्या त्वत्तीरें डान् स्वकानपि ॥ स्थापयामास तानेव त्वं पागर्वेण ली
लया ॥५७॥ हृतास्तदानीं गरुडः स्वाभिमानवशानुगः ॥ त्वदंतिकं समागत्य त्वद्दर्प
चचकर्तह ॥५८॥ इत्यशेषं परिज्ञातं त्वयास्मयकृ महोदधे ॥ किमन्यद्वद संप्रीत्या हृ
दि यत्संस्थितं तव ॥५९॥ कस्मिन्लुप्तकृतं सर्वमहं द्रक्ष्ये मुदा ॥ नारदस्य वचः श्रुत्वा
पुरनरा हसरित्पतिः ॥६०॥ सागरः ॥ मुने शृणु महाभाग तच्चविस्मयकारकं ॥

वते २

कदाचिन्नागरदेशस्था वाँल्मीकाः क्षुद्रजंतवः ॥ मन्नरंगप्रहारेण क्षुब्धा ह्यासन्श्रमान्वि
ताः ॥ बहिर्निष्क्रमणं कार्यमस्माकमिति चाब्रुवन् ॥ ६२ ॥ तथेत्युक्त्वा मया कारि प्रसक्ते
ते २ तेन कृपालुना ॥ सर्वैर्मिलिताश्चैव प्रत्यूचुः प्रीतिपूर्वकं ॥ ६३ ॥ प्रतिक्रियं करिष्यामो
वयं सादरमंबुधे ॥ यदा त्वयि महान्प्राप्तः संबाधो तीवदुस्तरः ॥ ६४ ॥ संस्मर्तैः परिहा
येसौ भवेदस्माभिरादरात् ॥ इति तेषां वचः श्रुत्वा पारिहास्यमुवाच ह ॥ ६५ ॥ मज्जलें
तः प्रविश्यायं जंतवो बहवः सदा ॥ तिमिंगिलादयः सर्वे तैः कर्तुं नापि शक्यते ॥ ६६ ॥
कथं युष्माभिरमितैः साधितुं क्षाम्यते वृथा ॥ मर्यादीरितमाकर्ण्य ते सर्वे पुनरब्रुवं
न् ॥ ६७ ॥ मास्तु बुद्धिर्लघुतरा इति तेंबुपते सदा ॥ त्वत्सहायं कर्तुकामा न भवामो
वयं यदि ॥ ६८ ॥ अस्माकं पापभीरूणां प्रत्यवायो महान्भवेत् ॥ इत्युक्त्वा च पुनः
सर्वैस्त्वाश्रमे प्रति ते ययुः ॥ ६९ ॥ तथेत्युदीर्य हिमापि सांतापि त्वातपो मुदा ॥ तदार १३
भ्य ब्रह्मसूनो वालुकाभिर्विनिर्मिता ॥ ७० ॥ परिणद्धा सुरेखा च सा नातिक्राम्य
ते मुने ॥ अतस्त्वां मुनिराट् हृल्लि प्रोक्तवानस्मि सादरं ॥ ७१ ॥ ततस्त्वयाज्ञोच्यमानं

तत्तथा प्रकरोम्यहं॥ इत्येवं बुपलेर्विप्रागिरमाकर्ण्य नारदः॥७२॥ उवाच कृपया विष्णुः स्मित्वा
देवगणैर्नुतः॥ त्वं हि पाहि रावर क्षिप्रं तवामाज्ञानकं कुरु॥७३॥ नव स्मरणमात्रेण यो
स्यांति बकुरास्तथा॥ एतदर्थं च संदेहः सर्वथा मास्तु सागर॥७४॥ मायाविनो महेन्द्रास्य
प्रभावोऽघटनाघटः॥ कीटादपि क्षुद्रतरे जीयंते वासवादयः॥७५॥ उच्चावचा अधो
यांति नीचा उच्चैः प्रयांति च॥ वैपरीत्येन योगेन भवंतीश्वरमायया॥७६॥ विचित्रमिद
माख्यातुं जेतुं केन च शक्यते॥ तस्यास्तावं रागं संर्वं कृत्स्नभासते सर्वथा जगत्॥७७॥
तन्मात्रे पैव त्वत्कार्यसिद्धिमेष्यति नान्यथा॥ इत्युक्तो नारदश्चापं स्वेच्छया संचर
न्पयो॥७८॥ अथार्णवेन मिलिताः संस्मृता यात्मिकौश्वये॥ चक्रुस्तद्धनुषो मो
व्यास्त्रोघंतेऽतीव वेगतः॥७९॥ शैथिल्येन च सिंजिन्याश्छिन्नपाशो न हेतुना॥ ज्वा
लमालासमायुक्तो मुक्तश्चापो भ्रुवांतदा॥८०॥ पुनश्च जलधेर्गर्वि संस्मृत्य परुषीं
गिरं॥ अतीवामर्षयुक्तः सन् बाणान् चिक्षेप पाणिना॥८१॥ यत्र यत्रैव सेक्षिप्तो
बाणः कालाग्निसन्निभः॥ तत्र तत्र च संदग्धं सलिलं सरितांपतेः॥८२॥ एवं क्र

मेण। सिंह्याद्रेः शिखरं शिखरं प्रति॥ छित्वाछित्वा सचिक्षेप बाणैर्णानथो चतुर्दश॥८३॥
आदावेकेन बाणेन द्विषड्योजनविस्तृता॥ तत्तत्क्रमादूनितं वै सार्धगव्यूतिमानतः॥८४॥
वैतरिण्याः प्रदेशाच्च यावच्छाल्मलकीनदी॥ मर्यादीकृत्य तत्क्षेत्रं क्षुराकारं प्रकीर्तितं॥८५॥
योजने चतुराशीति चतुःखंडेन संयुतं॥ रामक्षेत्रं च तत्प्रोक्तं सर्वाभीष्टप्रदायकं॥८६॥
इति श्रीस्कांदे सिंह्याद्रिखंडे स्वायंभुवे उत्तरभागे पंचमोध्यायः॥५॥ ऋषय ऊवाच॥
सिंधुराजमनुज्ञाप्य रामः शस्त्रभृतांवरः॥ ततः परं किमकरोत्कथयस्व महामुने॥
शौनकः॥ पुरः पश्चादपे धश्चोर्ध्वं दिग्धः पाशुपतादिना॥ तत्क्षेत्रमवलोक्याथ
सर्वप्राणिविवर्जितं॥२॥ प्रोक्षयामास मंत्रेण स्वकमंडलुवारिणा॥ बीजेनाग्नन रूपेण
जीवयन्निव सत्वरं॥३॥ तत्रागच्छन्नगस्त्याद्या ऋषयः सिंह्यरोत्तमः॥ बोधायनो वसि-
ष्ठश्च दाल्भ्यो वालीशावेल्लपाः॥४॥ कहोलो व्याघ्रपाच्चैव तृणबिंदुश्च कश्यपः॥ हि-
रण्यकेशी औरवेयः सत्यापाढश्चैव त्रिशिरः॥५॥ अत्रिश्च पुलहश्चैव बाष्कल-
श्चाश्वलायनः॥ अगमन्नृषयश्चान्ये शतशोथ सहस्रशः॥६॥ कैंगासो सा

वंकृषीणां च तपःसाधनमुत्तमं ॥२६॥ इक्षुपातां कितेराम क्षेत्रं ख्यातिं गमिष्यति ॥ इत्याशिषः सं
प्रयुज्य स्थितास्तत्रैव देवताः ॥२७॥ इति सैह्ये० स्वायुंभवे षष्ठोध्यायः ॥६॥ शौनकः ॥ शृणुध्वं
मुनयः सर्वे ब्रह्मा लोकपितामहः ॥ उवाच वचनं चारु भार्गवं मुनिसत्तमं ॥१॥ ब्रह्मोवाच ॥
जामदग्न्य महाभाग रेणुकानंदविग्रह ॥ समुद्रस्नानमाहात्म्यं क्षेत्रमाहात्म्यमुत्तमं ॥२॥
समुद्रस्य च माहात्म्यं क्षेत्रवासे च यत्फलं ॥ तत्रेस्मिन्म्रियमाणानां गतिं वद सुविस्तरात्
॥३॥ भार्गवः ॥ त्वं ब्रह्मन्त्वउद्भवाल्लोकाः सागरास्त्वप्रतिष्ठिताः ॥ त्वं सर्ववेत्थ भगवन् किं त्वं मां
प्रष्टुमर्हसि ॥४॥ तथापि त्वत्प्रसादेन किंचिद्वक्ष्यामि तच्छृणु ॥ पृथिव्यां संति तीर्थानि गो
दा कृष्णा च जान्हवी ॥५॥ सरयुः शोणभद्रश्च रेवा धाराश्च सरांसि च ॥ अन्येषां चैव तीर्थानां
सागरः शरणं परं ॥६॥ सागरस्य ध्वनिं श्रुत्वा दृष्ट्वा च पयसां निधिं ॥ मासद्वयकृतात्पापान्मु
च्यते नात्र संशयः ॥७॥ चांद्रैः षण्मासमभ्यस्ते यत्फलं लभते नरः ॥ सकृत्स्नानादवाप्नोति
तत्फलं पयसां निधौ ॥८॥ संगमे द्विगुणं तस्मात् त्रिगुणं शिवसंनिधौ ॥ संगमे शिवसान्नि
ध्ये तीर्थं सागरकेपि च ॥९॥ चतुर्गुणं संगमो यत्र तत्र स्नानं सुदुर्लभं ॥ चांद्रैः संवत्सराभ्यस्तैः

श्री

यत्फलं प्राप्यते नरैः ॥१०॥ तत्फलं समवाप्नोति तत्र स्नानान्न संशयः ॥ देवाकाल्या वनुस्मृत्य
पुलिने पयसांनिधौ ॥११॥ स्मृत्वा रामंच सीतांच हनुमंतं तथांगदं ॥ बिभीषणंच सुग्रीवं वालिं
वानरपुंगवं ॥१२॥ तीक्ष्णदंष्ट्रं महाकायं भैरवं तीर्थरक्षकं ॥ नमस्कृत्य नमस्कृत्य लब्ध्वानुज्ञां तु
भैरवात् ॥१३॥ वैवस्वतंच चित्रंच चित्रगुप्तं तथैव च ॥ पिप्पिलादसमुद्भूतां कृत्यां सागरसं
स्थितां ॥१४॥ आहारं वालुकापिंडं तस्यै दत्वा पुनः पुनः ॥ प्रविश्य तीर्थराजानं संतर्प्य पितृदे
वताः ॥१५॥ रामं सीतां लक्ष्मणंच हनुमंतं तथांगदं ॥ वालिं चित्रांगदंचैव बिभीषणमथाप
रं ॥१६॥ एतान्संतर्प्य विधिवद्यमतर्पणमाचरेत् ॥ अश्वत्थ सागरो सेव्यो नस्प्रष्टव्यो करा
चन ॥१७॥ अश्वत्थं मंदवारे तु सागरं पर्वणी स्पृशेत् ॥ विना मंत्रं विना पर्व क्षुरकर्म विना
नरैः ॥ कुशाग्रेणापि देवेश न स्प्रष्टव्यो महोदधिः ॥ ऋषभस्तत्र दातव्यः प्रवृत्ते क्षुरकर्म
णि ॥१८॥ प्रथमं स्नानियः सिंधौ नस्यायमुदितो विधिः ॥ ततः परं पूर्वविधिराब्धिस्नाने त्र
कीर्तितः ॥२०॥ रामक्षेत्रमिदं ब्रह्मन्कोकणाधः प्रतिष्ठितं ॥ समुद्रगर्भ इत्येतत्खं
डादंतिरिच्यते ॥२१॥ ऋषयः ॥ मुने कियानयं देशः कस्मात्कोकणसंज्ञकः ॥ मलाप
शौनकः ॥

द्वारीमारभ्ययावद्ब्रह्मगिरींगीत॥सैंह्याद्रिमध्यदेशस्ययोजनंद्वादशात्मकं॥विस्तृतंकोंकणं
तच्चविज्ञानीयाद्विशेषतः॥२३॥केरलःकोंकणश्चैवकीद्रूकश्चतथापरः॥एतेषुविषयेष्वेव
षण्मासंयेवसंतिहि॥सर्वधर्मबहिर्भूताःसर्वेतेब्राह्मणाधमाः॥तत्रैवतस्यजंतुःप्राणान्
यद्देशेरवगामिनः॥२५॥तिर्यग्योनिमवाप्स्यतियातनांतच्चदुःसहां॥तथाप्येतेषुदेशेषुपु
ण्यक्षेत्राणिभूरिशः॥नद्यश्चपर्वताःसंतिदिनमुक्तिप्रमाणतः॥वासमात्रेणयेलोकाःभु
क्तिमुक्तिंभजंतिहि॥२७॥रामः॥शंखोद्धारेनिवसतांद्वारकावासिनांतथा॥प्रयागवासि
नांनित्यमविमुक्तनिवासिनां॥२८॥यत्फलंतदवाप्नोतिक्षेत्रेनिवसतांनृणां॥येम्रियंतेचा
ब्धिमध्येगर्भेक्षेत्रेरामविनिर्मिते॥२९॥सत्यलोकमुषित्वातेमुच्यंतेसर्वकिल्बिषैः॥पु[illegible]
लिनेयेप्रमीयंतेदृश्यंतेपुलिनेपु[illegible]नेचये॥३०॥साक्षान्मोक्षमोक्षोभवेत्तेषांसत्यंसत्यंव
८ दाम्यहं॥जामदग्न्यस्येवदस्येवमाकाशोभवदैध्वनिः॥३१॥माकुरुष्वात्रसंदेहश्श्रुतिरेव
सनातनी॥इतिश्रुत्वातयोर्वाक्यंविश्वस्ताःसर्वदेवताः॥निवासयामासुरतोविस्रब्धा
श्चाकुतोभयाः॥शिवोविश्वेश्वरंलिंगंप्रतिष्ठाप्योमयासह॥३३॥इत्यामयातनुंश्री

मान् सुरद्वंद्वनिषेवितः ॥ स्थितस्तत्रैव सगणो रामम्मुदमावहन् ॥ ३४ ॥ रामबाणोद्भवल्लिंगं तत्रो
बाणेश्वरं महत् ॥ सप्तर्षिस्थापितं लिंगं सप्तकूटेश्वरं ततः ॥ ३५ ॥ ततः परं महातेजाः कुलि
केतो कुलिके नाम महान् ऋषिः ॥ कुलिकेतेश्वरं लिंगं सर्वलोक~~महेश्वरं~~ नमस्कृतं ॥ ३६ ॥ स्थ
पयामास विधिवत्तत्र देवः स्वयं स्थितः ॥ देवर्षिनिर्मिते क्षेत्रे तत्र लिंगान्यनेकशः ॥ संस्था
पितानि मुनिभिः सिद्धगंधर्वकिन्नरैः ॥ तत्तन्नाम्ना विख्यातानि भुक्तिमुक्तिप्रदानि वै ॥
धूतपापेश्वरो देवो लिंगरूपी महेश्वरः । स्वयं भागीरथी पातिल्लोकानघौघजिहीर्षया ॥ ३९ ॥
ततः परं महातेजाः करहाटो महामुनिः ॥ करहाटेश्वरं लिंगं स्थाप्य तत्रैव संस्थितः ॥
तत्र वैतरणी गंगा स्वयं सागरगामिनी ॥ तदुत्तरे बदरिकानरनारायणाश्रमः ॥ ४१ ॥
यत्र वेदध्वनिर्नित्यं निशीथे श्रूयतेधुना ॥ सर्वदेवगणैर्नित्यं सेवितो मुनिपुंगवाः ॥
॥ ४२ ॥ इति सैह्ये स्वायंभुवक्षेत्रमाहात्म्ये ७ ध्यायः ॥ श्री ॥ रामउवाच ॥ ततः परं गु ७ ॥
हक्षेत्रमस्ति ब्रह्मन् शुभप्रदं ॥ वक्ष्यामि तस्य माहात्म्यं शृणुष्वैतच्च सादरं ॥ १ ॥ कार्त्तिकेयो
गुहः साक्षाद्धरद्वाबाससमन्वितः ॥ आश्रमं कृतवान् सिंधोस्तीरे चाभिहितप्रदा ॥ २ ॥

गुहागारं गुहक्षेत्रं सर्वसिद्धैर्निषेवितं ॥ पंचशीर्षो महादेवो पंचोपनिषदात्मकः ॥ ३ ॥ पंचब्रह्ममयः साक्षाद्
पंचनारायणात्मकः ॥ ऋषिर्व्याडी तपःसिद्धिं कर्तुमाविरभूत्स्वयं ॥ तच्च ॥ व्याडीश्वरं लिंगं स्वयं ज्योतिः प्रतिष्ठि
तं ॥ यद्दृष्टं सिद्धगंधर्वाः प्रदोषे यांति नित्यशः ॥ ५ ॥ यत्र सत्यानृते व्यस्ते दृश्यते प्राणिनां स्फुटं ॥ यत्र दाश
रथी रामो रामक्षेत्रदिदृक्षया ॥ चरन् गुहाश्रमं प्राप्तस्तत्र स्कंदं ददर्श ह ॥ तं दृष्ट्वा च तदा रामो नमस्कृत्या
ब्रवीद्वचः ॥ ७ ॥ रामः ॥ कार्त्तिकेय महाभाग तारकासुरमर्दन ॥ सेंदेवसेनाधिप विभो दिष्ट्या दृष्टोसि
सुव्रत ॥ ८ ॥ पंचवक्त्रान्महादेवादधिकस्त्वं षडानन ॥ तां दृष्ट्वाहं कृतकृत्योस्मि प्राप्तोस्मि निर्वृतिं परां ॥
स्कंद ॥ राम राम महाभाग जानकीवल्लभ प्रभो ॥ स्वराज्यं संपरित्यज्य किमर्थमटसि प्रभो ॥ ९ ॥ न हि क्ष
त्रियबंधूनां प्रव्रज्या विहितं क्वचित् ॥ इति तद्वचनं श्रुत्वा रामः पुनरवोचत ॥ ११ ॥ रामः ॥ पितुराज्ञां पुरस्कृ
त्य ते न ज्ञेयोसि सुव्रत ॥ चतुर्दश समा राम वनवासं कुरुष्व ह ॥ १२ ॥ कौसल्याधायता माज्ञां विचरामि
महीमिमां ॥ स्कंद ॥ यदर्थमिह यातोसि यदर्थमटसि प्रभो ॥ १३ ॥ यान्हंता यान्हंतयिता न तत्सर्वं विदि
तं मया ॥ देवकार्यमिदं सर्वं त्वया कार्यमरिंदम ॥ १४ ॥ दशग्रीववधार्थाय साधूनां पालनाय च ॥
अवतीर्णोसि भगवन् तत्कुरुष्वावलंबितं ॥ १५ ॥ लक्ष्मणः शेषनागो यं दृष्ट्वा धक्ष्यति राक्षसा

न्तू॥ मायेयं वैष्णवी साक्षात्सीता रक्षोवधार्थिनी॥ १६॥ त्वं राम रघुनाथोसि मायामानुषविग्रहः॥ सच्चिदानंद
रूपस्त्वं श्रुतीनामप्यगोचरः॥ १७॥ दिष्ट्या यातोसि भगवन्त्रायो मय्यनुकंपया॥ तिष्ठ त्वमाश्रमे रम्ये
सिद्धे वर्षिसविते॥ १८॥ स्त्कं दत्त्रार्थनया रामः स्थितवानाश्रमे शुभे॥ रामेश्वरं महालिंगं स्थापयामास
राघवः॥ १९॥ सिंधुलिंगांतरावं यस्मात्तत्र मणिकर्णिका॥ तारकं तन्महाक्षेत्रं सर्वप्राणिविमुक्ति
दं॥ २०॥ रामतीर्थमिति ख्यातं सर्वतीर्थोत्तमं महत्॥ यत्र स्थितो यं संसर्गाद्ध्रुवमेव भवत्सहो॥ २१॥
यत्र क्वापि मृतानांच यत्र देहो विलीयते॥ पशूनां वानराणां वा ते सर्वे मुक्तिभागिनः॥ २२॥ सीताकृ
तं महालिंगं लक्ष्मणे वालुकामयं॥ वालुकेरामिति ख्यातं स्थापयामास सिद्धिदं॥ २४॥ × तेभ्यो
देहांतरं दत्वा तारकं प्रदिशाम्यहं॥ ततस्ते मुक्तिमायांति वदत्येतत्स्वयं शिवः॥ २३॥ × तउत्तरे मह
तीर्थं वरुणालयमुत्तमं॥ तत्र स्नात्वा शिवं दृष्ट्वा शिवं याति न संशयः॥ २५॥ तस्यैव पूर्वदिग्भागे घृ
णितीर्थमकल्मषं॥ घृणिप्रसादात्तत्रैव सांबः कुष्ठादमुच्यत॥ २६॥ ब्रह्मोवाच॥ कोसौ सांबः
कथं कुष्ठी घृणिश्चामोचयत्कथं॥ शुश्रूषवो वयं सर्वे विदश्रो न कश्चित्त्वत्तरान्॥ २७॥ त्वन्मुखां
भोजगलितं पीयूषं पिबतां मनः॥ न चैव तृप्तिमायाति तर्षयत्स धिकं पुनः॥ २८॥ शौनकः॥

प्रश्नो महोदयश्चाय मृषीणामूर्ध्वरेतसां ॥ इतिहासं प्रवक्तुं मां मुदा संप्रेरयस्यहो ॥२९॥ पुरा कश्चिन्म
हापापः सांबः क्षत्रियपांसनः ॥ बभूव दृष्टभिवपालः शठः परमदारुणः ॥३०॥ सभ्रमन्मृगया व्याजा
दृषीणामाश्रमं गतः ॥ स तत्राश्रममद्राक्षीत्सर्वजंतुमनोरमं ॥३१॥ सर्वर्त्तुकुसुमोपेतं कूजन्म
धुकरावृतं ॥ पनसैर्नारिकेलैश्च कदलीभिर्विराजितं ॥३२॥ सुगंधैर्होमधूमैश्च वेदध्वनिनिनादितं ॥
वेदवादैः समाघोषैः क्रियमाणैरहर्निशं ॥ शिष्यैर्विनिपसंपन्नैः क्रमसूत्रैः दिवाहृतं ॥ वेदनिष्ठैस्त
पोनिष्ठैर्ब्रह्मनिष्ठैरकल्मषैः ॥३४॥ आन्वितं मुनिशार्दूलैः सत्यलोकमिवापरं ॥ दृष्ट्वा तदाश्रम
पदं परं विस्मयमागतः ॥३५॥ तमागतं मुनिश्रेष्ठाः पूजयंति स्म सादरं ॥ तथापि नासौ विमनाः सौ
मनस्यमवापयत् ॥३६॥ बहिःप्रसन्नो विमनाः स्तान्सा धूर्त वदत्स्वयं ॥ प्रपद्य पूजयामास प्र
श्नं च कृतवानिमं ॥३७॥ प्रश्नं मनोगतं वेद्या तथ्यं वदत सुव्रताः ॥ पंयं ते कथयामासुस्ते नं नैवेति चा
वदत् ॥३८॥ बोच्चः क्रूरेन तान्सर्वान्क्षोभयामास दुर्मतिः ॥ ततस्ते कुपिताः सर्वे शेपुस्ते क्षत्रपांसनं ॥
कुष्ठी भव महापाप गलदंगो विशेषतः ॥ ब्रह्मशापहतः पापः खलः परमदारुणः ॥४०॥ गलत्कु
ष्ठी भवत्सोपि सद्यस्तत्क्षणं पर्यचिंतितः ॥ तानृषीन् छंदयामास विलापैः करुणैरहो ॥४१॥

मया पापेन मूढेन कृतं कर्म सुदारुणं ॥ को मूढश्चालये ह्येदं मुनीनामूर्ध्वरेतसां ॥ ४२ ॥ को विषं भक्षयेत्प्राज्ञः
पन्नगान्कः प्रबोधयन् ॥ सेवाति दारुणा बुधिः पूर्वपापसमुद्भवा ॥ ४३ ॥ अविनयमां पापरतिं पूर्वसं
क्षोभितायया ॥ ब्रह्मनिष्ठा ऋषयः सर्वे क्रोधलोभविवर्जिताः ॥ ४४ ॥ मामाश्रमपदंप्राप्तं ब्रह्मघ्नं निरप
त्रकं ॥ कृतघ्नं शरणं प्राप्तमनुकंपितुमर्हथ ॥ ४५ ॥ तेषामुद्दालको नाम ऋषिः कारुणिकस्तदा ॥ विल
पंतमुवाचाथ माभैस्त्वं क्षत्रियाधमा ॥ ४६ ॥ ब्रह्मशापकृतश्चायं व्याधिः परमदारुणः ॥ नचान्य
थाकृतं शक्यं कृतैः पुण्यशतैरपि ॥ ४७ ॥ तथाप्युपायं वक्ष्यामि पदुक्तं पद्मयोनिना ॥ उद्दालकः ॥
पुराकश्चिन्महाकुष्ठी मुंडनो नाम नामतः ॥ ४८ ॥ ब्राह्मणं तोषयामास ब्रह्मजाप्येन सर्वदा ॥ प्रा
तःस्नात्वा नित्यकर्म समाप्य प्रयतोन्वहं ॥ ४९ ॥ ब्रह्मोपस्थ उपस्थाय जपतिस्म निरंतरं ॥ तुष्टैस्तपसा स्त
ब्रह्मा सर्वलोकपितामहः ॥ ५० ॥ आकाशे गिरमुच्चैस्तां श्रावयामास सत्वरं ॥ वरं वरय भो विप्र प्र
सन्नोहं वरप्रदः ॥ मुंडिनउवाच ॥ यदि प्रसन्नो भगवन्व्याधेरस्मान्विमोचय ॥ ब्रह्मोवाच ॥
गच्छ शीघ्रं महाक्षेत्रं रेणुकेय शरांकितं ॥ ५२ ॥ तीर्थानां परमं तीर्थं त्रिषु लोकेषु विश्रुतं ॥
तत्रापि कार्तिकेयस्य क्षेत्रं गुह्यकरं महत् ॥ ५३ ॥ यत्रांबा वरदा साक्षाद्भक्तानां वरदायिनी ॥

तयासंलालितो नत्वं गुहक्षेत्रं नमुंचसि ॥५४॥ तत्क्षेत्रं पश्चिमांभोधेस्तीरे गव्यूतिमायतं ॥ तदर्ध
विस्तृतं क्षेत्रं सर्वदांभोधिसेवितं ॥५५॥ उत्तरे जंबुकादेवी दक्षिणे वालुकेश्वरं ॥ पश्चिमे रामती
र्थं तु हयतीर्थं तु पूर्वतः ॥५६॥ तस्यैवाग्नेयदिग्भागे घृणितीर्थमनुत्तमं ॥ नित्यं प्रस्रवणोपेतं
मशोकवनराजितं ॥५७॥ शिंशिपावनसंवीतं रसालवनराजितं ॥ तत्र गच्छ महाभाग घृणि
मंत्रमनुस्मर५८न् ॥ प्रदक्षिणनमस्कारान् कृत्वा स्नानपरायण ॥ त्रिरात्रान्मुच्यते कुष्ठान्नान्य
था मम भाषितं ॥५९॥ तन्नत्वा मुनिस्तस्मात् घृणितीर्थमुपागतः ॥ कार्त्तिकेयं गुहं नत्वा मातरं
वरदांबिकां ॥६०॥ सोऽरमष्टाक्षरं मंत्रं वरदांबोपदेशितं ॥ घृणिमंत्रमनुस्मृत्य तत्र स्नानपरा
यणः ॥६१॥ कुष्ठव्याधिविनिर्मुक्तस्त्रिरात्रात्सव्यराजत ॥ अतस्त्वमपि भूपाल शीघ्रं गच्छ गुहा
श्रमे ॥६२॥ वरदांबां कार्त्तिकेयमुपास्य ध्यानतत्परः ॥ अधिगम्य ततो मंत्रं वरदांबोपदेशि
तं ॥६३॥ कोटिवारं मंत्रजपात् स्नानात्त्रिषवणेरितान् ॥ मुच्यते ब्रह्महत्यापातं मासैस्त्रिभिरतं
द्रितः ॥६४॥ इत्युद्दालवचः श्रुत्वासौ वस्त्वान्नृपपुंगवान् ॥ प्रदक्षिणीकृत्य ययौ घृणितीर्थ
मनुस्मरन् ॥६५॥ चकार विधिवत्सर्वं मुनिनाभाषितं च यत् ॥ ब्रह्महत्यापहतः सोबः शुध्य

स्तत्राभवत्सुरा ॥ ६६ ॥ तस्यैवोत्तरदिग्भागे क्षयरोगहरं महत् ॥ यत्र चंद्रस्तपस्तप्त्वा क्षयरोगाद्
मुंचत ॥ ६७ ॥ इति श्रीस्कांदे सिंह्याद्रिखंडे उत्तरार्धे स्वायंभुवे गुहाश्रमवर्णनं नामाष्टमोध्या
य ॥ ८ ॥ ऋषयः ॥ सर्वज्ञोसि महाभाग वेत्थ च सर्वसंहितं ॥ चंद्रतीर्थस्य माहात्म्यं वद शौ
नक विस्तरात् ॥ १ ॥ शौनकः ॥ दक्षात्कन्याशतं जज्ञे सप्तविंशाधिकं पुरा ॥ तासां मध्ये च
द्रमसे सप्तविंशति कन्यकाः ॥ २ ॥ ददौ दक्षः समाहूय प्रजासर्गनियंत्रितः ॥ तासां मध्ये
प्रियतमां रोहिणीमन्वपद्यत ॥ इतराश्चाभ्यसूयंते रोहिण्यै दुश्चाद्दुःखिताः ॥ शेपुस्तां
रोहिणीं सर्वास्ततः साशशाकगभवत् ॥ ४ ॥ चंद्रं शशाप दक्षोपि ततः क्षीणोथ सोन्वहं ॥
विरूपा रोहिणी जाता कलाहीनश्च चंद्रमाः ॥ ५ ॥ निशाकरविहीना सा रजनी नान्वशो
भत ॥ निशाकरकरस्पर्शं जगदाप्यायते खिलं ॥ ६ ॥ तद्विहीनं जगत्सर्वं शून्यालयसमप्रभं ॥
ततस्तु देवताः सर्वाः शिवविष्णुपुरोगमाः ॥ ७ ॥ दक्षं ते भर्त्सयामासुर्धिग्बस्तमुखजीवितं ॥
चंद्रः सर्वस्वमस्माकं लोकत्रयविभूषणं ॥ ८ ॥ विना ह्यस्यापि जीवंति द्विजाश्च [illegible] द्रुकरैः
सदा ॥ सर्वासामोषधीनां च पतिरेकोयमात्मदः ॥ ९ ॥ दक्षः पापः पापमतिर्वीरभद्रेणशा

सितं॥ तथापिखलतां स्त्रीयां नैवमुंचति मे दधाः॥ मोहेनचलचित्तोभूत्सख्यात्तापेन दूरितः॥ दक्षस्त
तोतिनिर्विण्णः परं विस्मयमागताः॥ दुःखिनो म्लानवदनो जगादोच्चै दिवौकसान्॥ आदिदेवोम
हादेवः सांबः संसारमोचकः॥१२॥ अप्रमेयः परशांतो दयालुर्भक्तवत्सलः॥ अव्यक्तादीनिजा
तानि तानि यस्मान्महेश्वरात्॥१३॥ तस्य देवस्य माहात्म्यं वक्तुं केनापि शक्यते॥ तन्मायामोहिते
नापि मयापूर्वमकल्मषा॥१४॥ सर्वापद्विनिहर्तारं सोमं सोमार्धशेखरं॥ सर्वे वयमथो दांतं
गच्छामः शरणं महत्॥१५॥ इति दक्षवचः श्रुत्वा सर्वे देवाः सवासवाः॥ चंद्रेण कारयामासुः स्तुतिं
देवस्य शूलिनः॥१६॥ चंद्रः॥ नमस्ते देवदेवाय महादेवाय ते नमः॥ उमापते पशुपते कालकालौ
तक्रतुभे॥१७॥ नीलग्रीव नमस्तेस्तु प्रणतार्त्तिभंजन॥ शरण्यं त्वां प्रपन्नाः स्मः दक्षशापनिवा
रय॥१८॥ प्रादुरासीन्महादेवः स्तुतिहृष्टः सदाशिवः॥ उवाच चन्द्रनं प्रीत्या मेघगंभीरया गिरा॥१९॥
महादेवः॥ चातुर्वर्ण्यं पुरा सृष्टं ब्रह्मणा परमेष्ठिना॥ मुखाद्ब्रह्मकुलं सृष्टं तद्वचो नान्यथा
क्वचित्॥२०॥ तथाप्युपायं वक्ष्यामि भवेद्रोगहतिर्यथा॥ स्त्रीपुंसाम्येन वर्त्तस्व कालस्य
स्यसमभागतः॥२१॥ क्षयवृद्धी भवेतां ते पक्षयोरुभयोः क्रमात्॥ आपूर्प्पीनाते भवित

शो
सि
न

सवितुः करयो गतः ॥२२॥ तद्वियोगात्कलाहानिः पूर्णस्त्वं सर्वदाव्ययः ॥ चंद्रः ॥ दक्षशापात्कथं क्षी
णो नेजो मे विफलीकृतं ॥२३॥ सकलोहं कथं भूयां तेजश्चालीव निर्मलं ॥ तमुपायं वद विभो करु
णाकर शंकर ॥२४॥ महादेवः ॥ इक्षुपालांकितं क्षेत्रं रामनाम्ना विभूषितं ॥ तत्रापि यद्गुहक्षेत्रं वा
डीशाधिष्ठितं मम ॥२५॥ तस्याग्नेयदिग्भागे चंद्रतीर्थमनामयं ॥ तद्गच्छ तपसः सिध्यै ततः शुद्धो भ
विष्यसि ॥२६॥ शौनकः ॥ चंद्रस्तद्वचनं श्रुत्वा चंद्रतीर्थं जगाम ह ॥ तत्राश्रमपदं कृत्वा शैवं पंचा
क्षरं जपन् ॥२७॥ समाः सहस्त्रं कृतवान्तपः परमदारुणं ॥ तदधस्तात्तपश्चक्रे रोहिणी चंद्र
वल्लभा ॥२८॥ ततः काले बहुतिथे पार्वतीवल्लभः शिवः ॥ चंद्राश्रमपदं प्राप्तः क्रीडन्वल्लभया
सह ॥२९॥ तत्र चंद्रसमं दृष्ट्वा क्षामं प्रक्षीणकल्मषं ॥ पस्पर्श करुणाविष्टः करेणामृतवर्षि
णा ॥३०॥ ततः स्तु सकलो जातः प्रतपन्निव चंद्रमाः ॥ रोहिणी पार्वतीस्पृष्टा दिव्यरूपधरा
भवत् ॥३१॥ ततश्चांद्रमसं तीर्थं त्रिषु लोकेषु विश्रुतं ॥ तत्पुरस्ताद्देवतीर्थं यत्र देवाः पुरस्थि ॥२१॥
ताः ॥३२॥ देवसंज्ञं तदद्यापि लिंगाकारं प्रदृश्यते ॥ तत्पुरस्ताद्विभूतीनां कुंडं परमदुर्लभं ॥३३॥
यस्य संस्पर्शनात्स्व दारिद्र्यं नाप्नुयान्नरः ॥ विजयं प्राप्य सर्वत्र भुक्तिमुक्तिं च विंदते ॥३४॥

इति स्कांदे सेंद्ये० ९॥ ६॥ ऋषयः॥ विभूतिकुंडमाहात्म्यं वद शौनक विस्तरात्॥ धन्या वयन्न
तृप्यामः पिबंतस्तथामृतं॥१॥ शौनकः॥ देवदेव पुरा शक्रो विभूतिमदगर्वितः॥ नारदं दृष्ट
वान्मार्गे मोहासक्तमनास्तदा॥२॥ देवेन तां सार्वभौमाय ददौ कुसुममालिकां॥ तेन दत्तां पुष्प
मालां कूजद्भ्रमरसंकुलां॥३॥ ऐरावतगजस्कंधे स्थापयामास मंदधीः॥ अवलेपाद्विभु
त्वाच न ननाम युयथा पुरा॥४॥ इंद्रस्याविनयं दृष्ट्वा देवर्षिः प्रत्यभाषत॥ त्वमिंद्र देवराजो
सि यज्ञभागभुजां वर॥५॥ नित्यमम्लानमाल्या च मया ब्रह्मविनिर्मिता॥ दत्ता कथं परि
क्षिप्ता गजस्कंधोपरि त्वया॥६॥ वीणादंडसमाश्लिष्टा दातुं योग्या न कस्यचित्॥ इत्यु
क्त्वा दाय तां मालां वीणादंडे न्ययोजयत्॥७॥ मत्प्रसादाहृतं राज्यमधितिष्ठसि सर्वदा॥
इदानीं मामवज्ञाय वर्तसे भूतिगर्वितः॥८॥ मघवन्मदमत्तोसि विभूतेस्त्वं विमोक्ष्यसे॥
इत्युक्त्वा नारदस्तस्माद्भुमनाइव निर्ययौ॥९॥ इंद्रस्यैरावतगजस्तत्रैवांतरधीयत॥
दिव्यान्यश्वादिरत्नानि बहूनि क्षणमात्रतः॥१०॥ विभूतिमदमत्तस्य जालः सर्वधनक्ष
यः॥ ज्ञानांजनमिदं प्राप्तं दारिद्र्यं सर्वभेषजं॥१२॥ X अदृष्टान्यभवद्विप्रा नारदस्यावमाननात्॥

ततः परमाभिविल्लो मघवानिदमब्रवीत्॥११॥

बृहस्पतिः सुराचार्यः कथानो ननुलक्ष्यते ॥ धन्वंतरिभिषग्राजो नासत्यावश्विनावपि ॥१३॥
रंभाद्यप्सरसश्चैव कगनाः कल्पभूरुहाः ॥ घृतकुंडं सदाक्षप्यं शुक्लपल्लवसन्निभं ॥१४॥
दृष्ट्वा हरिर्विहाहो मे मरणं चैव कल्पते ॥ इंद्राणि त्वमिहागच्छ स्त्रिराभवमदासने ॥१५॥ विव
शा मे धवान्न प्राह पुनः पुनः रिदं वचः ॥ भवनांतगतः शक्रः शचिं तामन्वशोचयत् ॥१६॥ स
तदानीमहत्येव प्रेयसी निजवल्लभां ॥ बकुशो विल्वला पोच्चैः कयाना प्राणवल्लभा ॥१७॥
मामभाग्यं विशोचंतं विलपंतमनाथवत् ॥ नायात्यल्पोद्यापमास्तु भूमध्यप्यनुक्रोशवत्य
पि ॥१८॥ इति ब्रुवंतं विलपंतमुच्चैर्विधिविस्मचित्तं विवशां शुचार्पितं ॥ दृष्ट्वाभ्रमंतं भवनांत
राल्वे विकथमानं मुहुरास्मचेष्टितं ॥१९॥ परिभ्रमंतमटवीं प्रत्याश्रमवनांतरं ॥ क्षुत्पिपा
सार्दितं भूरिगतैश्वर्यमरिंदमं ॥२०॥ दृष्ट्वैनं मुनयः सर्वे देवर्षिर्नारदं तदा ॥ प्रोचुस्तपोध
नाविप्राः श्लक्ष्णया गंभीरया गिरा ॥२१॥ तदिंद्रचेष्टितं सर्वं नारदोऽत्र क्षणे वदत् ॥ नतः श्री ॥२२॥
ग्रमुपव्रज्य शंभवे विप्लवे वदन् ॥२२॥ नारदस्य वचः श्रुत्वा माधवः खगहृष्टतः ॥ जगा
म नंदनवनं तत्रेंद्रं च ददर्श ह ॥२३॥ अर्वाक्कुशिरा बभूवेंद्रो दृष्ट्वोपेंद्रं च हरंतः ॥ सोद

नासन्नकंठोपिरुरोदोच्चैस्तु बालवत् ॥२४॥ उपेंद्रस्तमुवाचाथ रोदिसि त्वं कथं प्रभो ॥ कस्मादि
दं ते कलिब्लं तद्वदस्वाविलंबतः ॥२५॥ इंद्रः ॥ नारदस्य प्रकोपान्मे सर्वापि श्रीः क्षयं गता ॥
वस्त्रं परिगतं यन्मे तदकस्मान्न दृश्यते ॥२६॥ इतोधिकं किं वक्तव्यं सर्वज्ञोसि जगत्पते ॥
गोतमस्य सती भार्या त्वहल्या पतिदेवता ॥२७॥ तयाभिभूतः सर्वांगे संज्ञातोस्मि भगव्र
पे ॥ वृत्रहत्याहृतः पूर्वं भ्रममाण इतस्ततः ॥२८॥ पुरोहितशिरश्छेदादगाधे दुःखसागरे ॥
मग्नस्त्वां नावमारुह्य मुक्तस्तस्मान्महाभयात् ॥२९॥ इत्येवमादि दुःखानि स्वल्पता
न्यल्पानि च ॥ निस्तीर्णानि महाबाहो त्वदग्रेजन्मजाद्भुतान् ॥३०॥ इदं कष्टतरं दुःखं ना
रदस्य प्रकोपजं ॥ इदं त्रैविष्टपराज्यं सर्वं विहतकंटकं ॥३१॥ नारदस्य प्रसादेन सर्वं
दा भुज्यते मया ॥ नारदो बुद्धिदो नित्यं पिता माता च नारदः ॥३२॥ सखा भ्राता च बं
धुश्च शास्ता शासयिता मम ॥ दैत्यानां विषमे युद्धे कष्टाणां चैव संकटे ॥३३॥ नार
दोक्तेन मंत्रेण जितवानस्मि तान् रिपून् ॥ तमहं नैव पश्यामि नारदं पितरं मम ॥३४॥

नारदेनविनादेवदीनोस्मिकृपणोस्म्यहं ॥ नान्यंनाथंप्रपश्यामिशरणंतंव्रजाम्यहं ॥ ३५ ॥ पुरं
दरवचःश्रुत्वानारदःप्रकयेभवत् ॥ प्रणेमुर्देवताःसर्वादृष्ट्वादेवर्षिमागतं ॥ ३६ ॥ देवराजः
प्रमुखस्तोदंडवत्पतितोभुवि ॥ देवर्षेत्वांप्रपन्नोस्मिदीनोस्मिकृपणोस्म्यहं ॥ ३७ ॥ अनुकंप
यमांनाथत्वांनाथंशरणागतं ॥ इतिसंक्रंदनेनापिमुहुःसंप्रार्थितोमुनिः ॥ ३८ ॥ जगादकृप
याविष्टोनारदोमधुरंवचः ॥ नारदः ॥ माभैस्त्वंदेवदेवेशभूत्याहीनोपिसांप्रतं ॥ ३९ ॥ पुनःसं
योक्ष्यसेस्वाभिर्विभूतिभिरसंशयः ॥ उपायंतेप्रवक्ष्यामिगच्छशीघ्रंगुहाश्रमं ॥ ४० ॥ प्रप
द्यस्वगृहंशीघ्रंवरदांबांचमातरं ॥ आपदुद्धारणंमंत्रंप्रपद्यस्वमहामते ॥ ४१ ॥ ताभ्यांकृ
तप्रसादःसन्गच्छकुंडंविभूतिदं ॥ तत्राश्रमंचकृत्वाथसमाराधयशंकरं ॥ ४२ ॥ आपदु
तिं द्धारकंदेवंभैरवंबटुकेश्वरं ॥ ततस्तुष्टोदेवदेवोविभूतिंतेप्रदास्यति ॥ ४३ ॥ नारदस्यव ॥२३॥
चःशीघ्रंश्रुत्वागत्वागुहाश्रमं ॥ गुहमेत्रमुपागम्यकुंडंगत्वाविभूतिदं ॥ ४४ ॥ तोषयामा
सदेवेशंनाम्नाबटुकभैरवं ॥ महापद्मश्चपद्मश्चशंखोमकरकच्छपो ॥ मुकुंदःकुंद

नीलाश्च निधयस्ते प्रजज्ञिरे ॥ हाहा हूहूश्च गंधर्वौ रंभाद्याश्चाप्सनायिकाः ॥ ४६ ॥ म्रदंगश्च
तिगीतेन घोषंतश्चापि लस्थिरे ॥ ऐरावतो गजेंद्रश्च चतुर्दंतविराजितः ॥ ४७ ॥ घंटाघर्घ
रिकानादैः प्रज्ञातः पुरतः स्थितः ॥ पतिव्रताशिरोरत्नं शची दासीशतैर्वृता ॥ ४८ ॥ प्रस्थिता च
विमानस्था पुरस्तात्समत्य दृश्यत ॥ ततः सर्वे देवगणाः परिवार्योपतस्थिरे ॥ ४९ ॥ बृहस्पतिः
शिष्यसहस्त्रसंयुतः ॥ समुत्थिरन्ब्रह्ममुद्रः सनातनं ।ऽतेजोवता देवगणेन सार्धं दि
वे भुवं खं च विभूषयन् स्थितः ॥ ५० ॥ बटुको भैरवः साक्षाछंकरो लोकशंकरः ॥ वृषपृष्ठं स
माश्रित्य पुरस्तात्प्रकटीभवत् ॥ ५१ ॥ दृष्ट्वा तं देवराजोपि जयशब्दं चकार ह ॥ जय शंभो म
हादेव जयाचिंत्य जयप्रद ॥ ५२ जय विश्वग विश्वेश जय त्रिपुरसूदन ॥ नमस्ते देवदेवाय
नमस्ते मदनांतक ॥ ५३ ॥ आपत्समयो निधिं मग्नं प्रपन्नं त्वत्पदांबुजं ॥ प्रसादं कुरु देवेश
श्रीर्यथा मां न मुंचति ॥ ५४ ॥ बटुकः ॥ मा भैस्त्वं देवराजोच्चैः श्रिया युक्तो भविष्यसि ॥ ५५ ॥
ऋषयः सर्वदेवाश्च निधयश्चाप्सरोगणाः ॥ बृहस्पतिपुरोधश्च शची साध्वी प्रि
येवदा ॥ ५६ ॥ हयश्चोच्चैःश्रवाश्चायं गजेंद्रो निजवाहनं ॥ एतच्च सर्वं संप्राप्य सच

रं मत्प्रसादतः ॥५७॥ भवेदक्षय्यमेवाशु त्वं गछ निजमंदिरं ॥ ततः सवे देवगणाः
प्रणेमुस्तं सुराधिपं ॥५८॥ इत्येवमुक्तस्तुषितेन शंभुना पुरंदरो नारदतुंबराद्यैः ॥
प्रस्तूयमानः शुशुभे सुरेंद्रैः प्रकीर्यमाणः कुसुमैर्दिवच्युतैः ॥५९॥ ऐरावतं दे
वगजेंद्रमुच्चैः पुरोधसामंत्रितमारुरोह ते ॥ आधिष्ठितः सर्वसुरैकसेव्यः
प्रगीयमानो प्सरसांगणेन ॥६०॥ स्तुष्टुवुर्देवगंधर्वाः नन्नृतुश्चाप्सरोगणाः ॥
जयशब्दं चकारोच्चैः पुरोधास्तदनंतरं ॥६१॥ ततस्तीर्थजलैः सर्वैरभि
षेकं चकार ह ॥ शच्यासुरत्क यासार्द्धं ययौ नाकपुरंदरः ॥६२॥ इत्येतत्क
थितं सर्वं श्रीरामक्षेत्रवर्णनं ॥ मुनयः परिपृच्छंतु किमन्यद्धृदि संस्थितं ॥६३॥ ॥२७॥
इति श्रीस्कांदे सिंह्याद्रिखंडे उत्तरार्धे स्वायंभुवे इक्षुपानक्षेत्रवर्णने दशमोध्याय
यः ॥१०॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

॥ऋषयः॥ अस्मिन्क्षेत्रे निवसिताः पुत्रपौत्रादिसंयुताः॥ विप्राः स्वनाम्ना विख्याताः भार्गवेण वि
निर्मिताः॥१॥ तेषामाख्यानकं सर्वं वद शौनक सादरं॥ परं भूयः श्रद्धालुतां नो ब्रह्मन् ब्रह्मविदां वर॥२॥
शौनकः॥ क्षत्रियान्तकरो रामस्तीर्थयात्रादि पर्यटन्॥ कदाचिदागतः श्रीमान् पयोष्णीसददर्वा
हु॥३॥ यज्जलस्पर्शमात्रेण मर्त्यो भवति चानघः॥ तत्तीरवासिनः सर्वे तरुगुल्मखगादयः॥४॥
मत्स्यादयोपि धन्यास्ते यज्जलावासिनः सदा॥ यत्र लिंगान्यनेकानि संति कैवल्यदानि च॥५॥
ऋषिणामाश्रमाश्चैव बहवः शिष्यसंरताः॥ त्रैविद्यानामनुर्दिनं श्रुतानां चैव भूरिशः॥६॥ सुघो
षः सुखदस्तस्यात्र भवति ब्रह्मवादिनः॥ तत्तीरे श्रीवने रम्ये दृष्ट्वैकमनन्तेश्वरं॥ कहोलेनार्चितं लिंगं भु
क्तिमुक्तिप्रदायकं॥ भार्गवो मुनिशार्दूलः पूजयित्वा यथाविधिः॥८॥ ततः क्षणं ध्यानपरोऽभवदेका
ग्रमानसः॥ एतस्मिन्नंतरे ह्यासीन्महाकोलाहलो ध्वनिः॥९॥ भारेण महता भग्नः प्लवः कैवर्तकैः
सह॥ ममज्ज सरिदावर्त्ते भ्रमज्जलसमाकुले॥१०॥ केचित्तीर्णाम्रताः केचिदपरे नष्टसंज्ञकाः॥ नि

॥भग्नानां च केषांचिन्मध्ये प्रेताश्चतुर्दश ॥११॥ प्रवाहता संचलितास्तरंगांदोलितास्तथा ॥ तीर
प्रांते च पतिताः लुलिता वालुकांतरे ॥१२॥ ध्यानावसानसमये श्रीरामः करुणानिधिः ॥ तान्
दृष्ट्वा मृतकर्षेण नेत्रप्रांतेन भूयसा ॥१३॥ पूर्वार्जितानि कर्माणि ज्ञात्वा कालत्रयार्थवित् ॥ संस्मृ
त्य सकलं तेषां मुनयो निर्मलाशयाः ॥१४॥ सर्वतीर्थमयैः पूर्णैः कमंडलुजलैस्तथा ॥ मृतसंजी
वनीमंत्रैः शतमष्टोत्तरं पुनः ॥१५॥ मंत्रितैश्च करे दत्वा सिंचयित्वाथ तत्क्षणात् ॥ प्रेतानूसंजी
वयामास भार्गवो मुनिसत्तमः ॥१६॥ अथ चैतन्यसंप्राप्ताः स्वकरस्पर्शमात्रतः ॥ तं दृष्ट्वा संप्रभा
वाच्च दृढांगाः क्षीणकल्मषाः ॥१७॥ तेजःसत्वाभिसंपन्ना रूपोदारगुणान्विताः ॥ दंडवत्पतिता
भूमौ स्तुतिं चक्रुर्मुदान्विताः ॥१८॥ जीवितपुरुषाऊचुः ॥ नमो नमस्ते देवाय नमस्ते भक्तनाश
क ॥ नमस्ते भक्तरूपाय कालकालांतकाय च ॥१९॥ नमस्ते ब्रह्मरूपाय नमस्ते वैष्णविष्णुरूपिणे ॥
नमस्ते रुद्ररूपाय भार्गवाय नमो नमः ॥२०॥ नमस्ते नंतरूपाय नमः स्वेष्टप्रदायिने ॥ समस्त

॥२५॥

घौघनाशाय नमः क्षत्रकुलांतक ॥२१॥ नमस्ते शांतदीपाय नमस्ते भक्तवत्सल ॥ नमो राजीवनेत्रा
य नमः पाशुपताधिप ॥२२॥ नमस्ते जामदग्न्याय नमस्ते रेणुकात्मज ॥ लोकातीताय गुरवे चैत
न्यात्मकते नमः ॥२३॥ अद्विंसोद्यप्रमे यो सो भिसंतायो जगत्रयं ॥ त्वं हि वेत्थ महाभाग स
र्वान्भावान्दकृपानिधे ॥२४॥ इति संप्रार्थितः श्रीमान्वंदितश्च पुनः पुनः ॥ स्तोत्रेणानेन भ
गवान्संतुष्टो विष्णुरव्ययः ॥२५॥ अथ जान्वालनोपेतान्सुरूषान्मुनिपुंगवः ॥ जातकर्मादि सं
स्कारान्नृपयथाविधि विभागतः ॥२६॥ गृह्योक्तैः श्रौतलिंगैश्च मंत्रैः संस्कुर्वीत स्वयं ॥ अ
यदेवर्षयः सर्वे नानादेवगणैर्युताः ॥२७॥ संप्राप्ताः सिद्धगंधर्वयक्षविद्याधरैस्तथा ॥ किं
नरैश्चाप्सरोभिश्च स्तूयमानपदांबुजा ॥२८॥ योगांवारक्तचामुंडा योगिनीगणसंयुता ॥
आयातां बालयाद्रामं भार्गवं च दिदृक्षया ॥२९॥ ततो भगवत्तीं दृष्ट्वा रामश्चोत्थाय मातरं ॥
योगीश्वरीं पूजयित्वा नत्वा स्तोतुं प्रचक्रमे ॥३०॥ रामः ॥ नमामि मातः कमलाननां त्वां मने

कबालार्कमरीचिसन्निभां ॥ खडेंदुचुडामणिभूषणाढ्यां ॥ शिवां परब्रमयीसदात्मिकां ॥ २१ ॥ चिदं
बुधोर्वीचिमयीं जगन्मयीं पुत्रत्रयाधिष्ठितविश्वमायया ॥ परापरे शास्त्रविभावनीहतां त्रिलो
चनांबुजयोनिमात्रकां ॥ २२ ॥ महत्तरां चाण्वतरां महेश्वरीं गिरं भवानीं महिषीं परस्य ॥ स्वधा
वषट्कारहविःस्वरूपिणीं हविर्भुजं यज्ञमयीं महभुजे ॥ २३ ॥ त्वमादिदेवी त्रिगुणात्मधा
रिणी पराविभूतिर्जगदादिकारिणी ॥ त्रयीमयी विश्वसृजादिभिः स्तुता ते सुधामयी विश्वभ
ते नमोस्तु ते ॥ २४ ॥ ये त्वां प्रपन्नार्तिहरां भजंते न दाल्यस्त्वां श्री यमातनाषि ॥ पराङ्मुखा
स्त्वय्यशुभं लभंते शुभाशुभं त्वं भवती प्रयाति ॥ २५ ॥ धृतिः पुष्टिस्तथा तुष्टिः शांतिर्योगस्व ॥२दी॥
रूपिणी ॥ योगनिद्रा भगवती चामुंडा शुंभमर्दिनी ॥ २६ ॥ निशुंभस्य प्रमाथिनी रक्तबीजवि
नाशिनी ॥ अशेषदानवेंद्राणां संहर्त्री मंगलप्रदा ॥ २७ ॥ नमस्ते देवदेवेशि सर्वाभिष्टप्रदायि
नी ॥ सर्वदुःखौघशमनी नमस्ते लोकवंदिते ॥ २८ ॥ शौनकः ॥ इति स्तुता भगवती नत्वारा

मोमुक्तुर्मुक्तुः ॥ तुवाच वचनं चारु सर्वेषां हितकांक्षया ॥ ३९ ॥ मद्भिर्निर्मित तत्सुक्षेत्रे इषुपालनसंज्ञिते ॥
स्तदने कविभूषाच युताल त्रस्छिरा भव ॥ ४० ॥ स्वभक्तानां च सर्वेषां मनोभिलषितान्वरान् ॥ द
त्वा भगवती देवी देवताभिर्भ्रसंयुता ॥ ४१ ॥ मया निर्मितविप्राण्यां वंशमार्गानुसारतः ॥ देवतत्वं
सदा प्रीता भव तेषु दयां कुरु ॥ ४२ ॥ यइदं पठते भक्त्या प्रसादाष्टकमन्वहं ॥ सिध्यंतु सकलात्थे
र्थास्तत्प्रसादाच्च शोभने ॥ ४३ ॥ इति रामवचः श्रुत्वा संतुष्टा सर्वमंगला ॥ तथेत्युक्त्वा भग
वती तत्रैवांतरधीयत ॥ ४४ ॥ तदानीमागता विप्राः मंत्रदृष्टास्तपोधनाः ॥ ब्रह्मर्षयः कश्य
पाद्या ऋषिवृंदसमन्विताः ॥ ४५ ॥ भगवंतं प्रणेमुस्ते ब्राह्मणा वितकल्मषाः ॥ तपस्विनो
ध्याननिष्ठाः मधुरं वचनं ततः ॥ ४६ ॥ अवदन्मुनिशार्दूलाः ॥ किं कार्यं हृत वान्भवान् ॥ चिरंतनं स्थि
भाग तं यच्च वर्णाश्रमविभाभितः ॥ ४७ ॥ साधर्म्यं भवता हत्त्वा स्थितं योजितं तत्र तत्र च ॥ इदानीं श्रुतिधर्मा
श्चत्वया लुप्ताः कथं विभो ॥ ४८ ॥ अतोस्मान्संत्यज त्वात्यान्कर्महीनान्दुरासदान् ॥ ऋषीणां व

चनं कृत्वा भार्गवः सर्वगो[illegible]वचः ॥४९॥ सर्वतंत्रस्वतंत्रात्मा नियंता मुनिसेवितः ॥ प्रक्षु
च्चे सर्वधर्मज्ञस्तानृषीन्मुनिपुंगवान् ॥५०॥ भार्गवः ॥ अस्मिन्काले संस्कृताश्च मयैते जीवि
तानराः ॥ समुद्धरत तीर्थं च शिक्षापयत भोद्विजाः ॥५१॥ स्वस्वान्वयेपि गण्याश्च सहायाज्ञादृढ
तः दृढव्रताः ॥ द्विजधर्मे गोपनीयाः मदनुग्रहवर्तिनः ॥५२॥ भार्गवेणेरिताः सर्वे ज्ञात्वा स्वात्तं त्र्यम
स्य च ॥ तथेत्याज्ञां शिरः कृत्वा प्रययौ मुः पादपंकजं ॥५३॥ तदा वसिष्ठो गार्ग्यश्च कपिवत्सनिकुल्म
काः ॥ अत्रिबाभ्रव्यकौंडिण्याः कौशिकाः काश्यपः [illegible] ॥५४॥ सुमंतुर्जामदग्न्यश्च शांडि स्तथा ×
ल्यो विष्णुवर्धनः ॥ भरद्वाजोथ ऋषयश्चैते स्वस्वान्वयेपि च ॥५५॥ चतुर्दशा च संख्याका ऋषयो
गोत्रव र्धनाः ॥ चतुर्दशात्मविद्याभिस्ताः शिशिक्षुर्मुनीश्वराः ॥५६॥ यज्ञदानतपोभिश्चैतो ॥२७॥
षयंती स्म भार्गवं ॥ ततो सौ मुनिभिः साकमाययौ भार्गवं मुदा ॥५७॥ इषुपातन सुक्षेत्रे स्थाप
यामास तान्द्विजान् ॥ दत्वा बहून्वरान्प्रीत्या जामदग्न्यः प्रतापवान् ॥५८॥ ददौ बहुधनं चैव

पारिजातादिद्रुमाखिनः॥ सर्वार्थसिधिंदारांश्च रूपलावण्यसंयुतान्॥५९॥ पुत्रान्पौत्रान्गोधनंचैव
स्त्रान्याभरणानिच॥ देशासां कौरिकांभाषांशीक्षयामास तान्द्विजान्॥६०॥ कनीयसांजायसोग्रेपं
चत्वंनभवेत्तदा॥ सौमंलीनामवैधव्यं प्राप्नोतु मदनुग्रहात्॥६१॥ योगांबिकामज्जननी यादेवीलो
कपावनी॥ भक्ताभिष्टप्रदानित्यं सर्वसंपत्करी शिवा॥६२॥ तां भजध्वं सदा यूयं मम संतुष्टिहेतवे॥ यु
ष्मत्कुलप्रसूतासाच सेव्यतामंबिकासदा॥६३॥ इक्ष्कदीर्यमहातेजास्तत्राद्द्रूपमभूत्प्रभुः॥ राम
प्रसादान्मुनयो द्विजास्ते सुखिनःस्थिताः॥६४॥ इति श्रीस्कांदेसैंह्येस्वायंभुवेइषुपातनक्षेत्र
वर्णने रामप्रसादवर्णनंनाम एकादशोध्यायः॥११॥ ॥शौनकः॥ श्रीमत्सरशुरामेणासं
स्त प्राप्तविभवाश्चैते॥ निर्विशंकाबभूवुस्ते विबुधाइव रेजिरे॥१॥ एवं दिनान्यतीतानि बहूनि मुनिपुंगवाः॥
ऐश्वर्यमदभारेण्यामत्तामायाविमोहिताः॥ विभ्रांतचित्ताविवशास्तशासनपराङ्मुखाः॥ एकदामिलि
ताश्चासन्विप्रास्तेमंदबुधयः॥२॥ अन्योन्यमुह्काकेचित्तुत्तातुंदत्तवरोचितान्॥ अज्ञानवशगाःसर्वे:

मथ्यमानास्तदाऽभवत्॥४॥रामोऽस्मभ्यं वरान्दत्वाप्रोवाच्च वचनं मुदा॥यदा यदा मां स्मरत न भवत्क्लेशं तदा
तदा॥५॥सत्वरं नाशयिष्यामि कुरुध्वं नात्र संशयं॥ये केचिदन्यदेशीया रामक्षेत्रमुपाश्रिताः॥६॥
अथार्यदेवराष्ट्रीयप्रमुखाश्चाकुरागताः॥योदेवः सर्वदेवानां भगवान्विष्णुरव्ययः॥दुर्वृत्तानां च
शास्ता च नियंता धर्मवर्धनः॥तस्मिन्भवद्भिर्नो साध्यः संशयः क्लेशकारकः॥एतावत्कालमर्यादि
ष्टस मिथ्यामयं तथा॥कापद्यं चिंतयंतश्च संशयाविष्टचेतसः॥१०॥परीक्षायां चिकीर्षंतो भक्ष
यित्वा स्वयं विषं॥न जीवंति मया विप्राः दृष्टमद्य तथैव हि॥११॥इत्युक्ता भार्गवी यास्ते पुनरूचुरिदं व
चः॥यद्यप्यसौ महाविष्णुश्छद्मना बलिपूर्वकान्॥१२॥असुरानजयत्सर्वं तस्मान्नः संशयो भवे
त्॥ज्ञात्वा दुराशयाविष्टान्प्राहुः सत्पथगामिनः॥१३॥धिगिदं छद्मचापल्यं कामलोभपरैस्तथा॥ ॥२७।
दंभासूयपरैर्निंद्यं हलतं कर्म दुरासदं॥१४॥देवतासु च विप्रेषु गोषु साध्वीषु बंधुषु॥कापट्यं ये प्रकुर्व
र्यो स्तेषां निरयं दुरात्मनां॥१५॥भवेन्निरयवासश्च पुनरावृत्तिदुर्लभः॥आचार्येषु च मित्रेषु तथा गुरु

कुलेषु च॥कार्पण्यं ये प्रकुर्वंति तेषां नैव च निष्कृतिः॥मातापितृजनेष्वेव बालेष्वापत्सु चै
व हि॥ये छद्मनियं कुर्वंति तेषां नैव च निष्कृतिः॥मित्रभेदं प्रकुर्वाणाः सदा चानृतवादिनः॥
अधोगतिर्भविष्यंवि वेत्तेषां यावत्स्थावरजंगमं॥श्रुताध्ययनसंपन्नाः श्रुतिशीलसमं
न्विताः॥सदाचाररता नित्यं यज्ञदानतपःपराः॥निर्मलज्ञाननिष्ठाश्च प्रशांताः सत्यवादि
नः॥२०॥तैः सहानुदिनं जैह्म्यं प्रकरोति नराधमः॥कृतांतसदनं याति न पुनः सुखभाग्भवे
त्॥२१॥एगुणाः साधिताः पूर्वं शीलाचारश्रुतादिभिः॥सर्वे ते नाशमायांति कौटिल्यपथ
गामिनां॥२२॥पापं निंदा भयं वैरं चत्वार्येतानि दृहिनां॥छद्ममार्गप्रपन्नानां तिष्ठंत्ये
व हि सर्वदा॥२३॥तस्मात्सद्भिर्न कर्तव्यं कापट्यं संशयात्मकं॥भक्तानां संगदोषाच्च पापिष्ठा
नां दुरात्मनां॥२४॥प्रस्फुतप्रत्यवायश्च भवेदस्मात्तु सर्वदा॥अतोऽस्मिन्नपि चास्माभिर्न
स्थातव्यं च सर्वदा॥२५॥एवं निशम्य संशयिताताभिर्वि[illegible]ः ज्ञाः पापभीरवः॥समुत्तस्थु

निर्गताश्च रामस्तेत्रान्मुनीश्वराः ॥२६॥ शौनकः ॥ समाख्यान्यायवत्संतां प्राप्ताये न्येपिमा
नवाः ॥ ते सर्वे स्वस्वदेशेषु पुनर्गत्वा प्रतस्थिरे ॥२७॥ अथैते देवदेवस्य मायया मोहि
ताःस्तथा ॥ मूढात्मानोमंदाधाश्च कुमारं जीवितं तदा ॥ पंचत्वं गतमिक्ष्वैते रुरुदुः
शोकविह्वलाः ॥ चितायां स्थापयित्वाथ रटंतम्मुकुंदुमुकुंदुः ॥२९॥ दीनानस्मान
नाथांश्च रक्षरक्षेति चाक्रंदन् देवदेव जगन्नाथ त्राहि विश्वंभर प्रभो ॥३०॥ चितान्नि
तापात्तं बालं प्रद्रुतं वीक्ष्य सत्वरं ॥ एतद्वचनमाकर्ण्य प्राकुद्धदुरासीज्जगत्पतिः ॥३१॥
स्मृतवंतः किमर्थं मां कारणं ब्रूत तत्वतः ॥ नो चुस्तदानीं ते सर्वे तूष्णीभूताः शिला
इवा ॥३२॥ एभिः कृतं कैतवं ज्ञात्वा रामः स्वयं विभुः ॥ दुर्वचः क्रोधसंतप्तः प्र ॥२९॥
लयानलसन्निभः ॥३३॥ तांश्छित्वा निरतान्मूढान् रामः शापमुपाक्रमत् ॥ म

द्वेलस्तापकरणाच्छिन्नदग्धाव्हयास्तथा ॥ ३४ ॥ यज्ञोभिश्चतपोभिश्च भग्नायूयं भविष्यथ ॥ ग
तैश्वर्यालाघवाश्च याचकाश्च गृहे गृहे ॥ ३५ ॥ नानापथजुषः सर्वे सदा चातथ्यवादिनः ॥ मात्स
र्यगुणसंविष्टाः पापोपहतचेतसः ॥ ३६ ॥ कृषिगोरक्षवाणिज्यवृत्त्याचरननिंदकाः ॥ आरा
माधुपजीव्याश्च भवतामोघपातकाः ॥ ३७ ॥ नष्टछायुक्ता भविष्यंति प्रतिग्रहरताः सदा ॥ वेदि
कत्वं पुरस्कृत्य शूद्रेभ्यो निद्ययाचकाः ॥ ३८ ॥ असत्प्रतिग्रहाः सर्वे नानानिरयगामिनः ॥ भ
विष्यंति भवंतोपि केचिद्वै ब्रह्मराक्षसाः ॥ ३९ ॥ यश्चिताधूमसंपर्कात्कडाराः श्मश्रुलोमकाः ॥
पाटलांगाविलाक्षाः भो सर्वे ब्राह्मणाधमाः ॥ ४० ॥ मध्यान्हात्परतो यूयं भवताशुचिनः सदा ॥
इत्यादिशापानुप्रददौ स सर्वज्ञः कृपानिधिः ॥ ४१ ॥ ततोतिभयमापन्नाः शापदग्धानरा
धमाः ॥ ते सर्वे भगवंतं तं पुनः शरणमाययुः ॥ ४२ ॥ नमो देवाधिदेवाय कैवल्यपतये नमः ॥
नमः परशुरामाय सर्वेषां प्रभवे नमः ॥ ४३ ॥ सर्वतंत्रस्वतंत्राय लीलाविश्वंभराय च ॥ जगदु

सप्तिसंहारस्वाधिष्ठानायते नमः॥४४॥ परित्राणाय साधूनामवतारः कृतस्त्वया॥ पतितोद्धा
रकस्वामिन्नमस्तेऽसुरसूदन॥४५॥ विचित्रकर्मं त्रैश्गार्ङींवा मुनिभिः पूजितांघ्रये॥ भा
र्गवाय नमस्तुभ्यं नमो राजीवलोचन॥४६॥ रेणुकाहृदयानंद जगन्मूर्त्ते नमो नमः॥
नमः कारुण्यदेहाय जामदग्न्य नताघह॥४७॥ पीतकौशेयवसन सूर्यकोटिसमप्र
भा॥ नमस्ते सत्यसंधाय नमः क्षत्रकुलांतक॥४८॥ अज्ञानत्वम नमान्मंदान् त्वन्मायया
मोहितान् सदा॥ पाहि पाहि कृपासिंधो दीनार्त्तपरिरक्षक॥४९॥ इति स्तुवा चनस्तावच
दंडवत्पतितो भुवि॥ ततस्थ कृपयाविष्टो रामोकैं भृगुकुलोद्वहः॥५०॥ प्रसन्नांतो भगवा ॥३०॥
नीरास्तत्क्षणस्तवमात्रतः॥ उवाच वचनं चारु द्विजांस्तान्नतकंधरान्॥५१॥ रामउवाच॥
मयोक्तानि तु वाक्यानि व्यलीकानि कदाचन॥ न भवंति च यूयं मे शृणुध्वं वचनं हितं॥५२॥
मय्यावेशितमनसो मत्पादकमले रताः॥ मन्नाम्नैव प्रविख्याता मध्यान निरताः सदा॥ मद्दि

निर्मितसुक्षेत्रे पूज्यमानास्तपःपराः॥ मत्कथाश्रवणेसक्ता भवत्क्लेशवर्जिताः॥५४॥ सत्संगाभिरता
नित्यंतुल्यनिंदास्तवात्मकाः॥ परनिंदापवादांश्चतथाहंकारमेवच॥५५॥ उत्सृष्टवंतःसततंक्रो
धलोभविवर्जिताः॥ पक्ष्मात्सर्यदंभाश्चपैशुन्यासूयवर्जिताः॥५६॥ नित्यंप्रियवदाश्चैवसु
हृद्भावमुपागताः॥ येसर्वेधर्मसंपन्नाः प्रशांतावीतरागकाः॥५७॥ तेषामेवप्रदास्यामिस
द्गतिंमोक्षदायिकां॥ इत्युदीर्यवचोरामस्तत्रैवांतरधीयत॥५८॥ शौनकः॥ अत्रैवोदाहरंतीममि
तिहासंपुरातनं॥ असाश्चर्यकरंनृणांश्रोतृणांचहीनप्रद॥५९॥ कदाचिद्दाक्षिणात्यानांविप्रा
णांगौतमोमुनिः॥ शशापातीवकोपात्तच्छृणुध्वमृषिसत्तमाः॥६०॥ द्वादशाब्दमनावृष्ट्यादेशो
यंक्षमित्तोयदा॥ दुर्भिक्षपीडि[illegible]ताः सर्वेस्वस्वदेशाद्विनिर्गता॥६१॥ गौतमस्याश्रमंपुण्यंस
र्वदुःखविवर्जितं॥ समाययुस्तान्दृष्ट्वाथगौतमः करुणानिधिः॥६२॥ लालयित्वासुवचनैरुदा
रैरवदन्मुनिः॥ क्षुत्पिपासार्दिताःसर्वेदक्षाधाः सकुटुंबिनः॥६३॥ यूयंचिंतांमाकुरुध्वंसुखि

नः स्तिष्ठतात्र वै ॥ इत्युदीर्य महातेजाः मुनिनां प्रवरस्ततः ॥ ६४ ॥ तेषां वासाय सस्थानि कल्पि
तानि बहूनि च ॥ स्थापितानीच वासांसि बहूनि प्रददौ मुनिः ॥ ६५ ॥ तपोधनप्रभावाच्च मुनिनो
रक्षिताश्रये ॥ कदाचिदपि ते सर्वे स्वदेशागमनोद्यतः ॥ ६६ ॥ पप्रच्छ मुनिशार्दुलं द्विजा विन
यपूर्वकं ॥ तपोनिधे महोदार भावितात्मन् गतस्पृह ॥ ६७ ॥ अस्मद्राष्ट्रे सुभिक्षं च सुवृष्टिः
सर्वतो भवेत् ॥ अज्ञां देहि कृपासिंधो स्वदेशागमनाय वै ॥ ६८ ॥ इत्याकर्ण्य वचस्तेषां मुनि
नां प्रवरोब्रवीत ॥ यत्र राजा धार्मिकस्त्र देशास्तु निरुपद्रवः ॥ ६९ ॥ भूमिस्तु सर्वसस्याढ्या
फलिनश्छायया रताः ॥ गावो यत्र बहुक्षीरा कुशादि निलयानि च ॥ ७० ॥ वदान्याः धनिनः संति
श्रोत्रियाः संति साधवः ॥ नद्यः सरांसि तीर्थानि पुण्यदानि शुभानि च ॥ ७१ ॥ तत्रैवावसथः कार्यः सर्व
दा शुभकांक्षिभिः ॥ मदीये चाश्रमे नित्यं सर्वाभिष्टकरे शुभे ॥ ७२ ॥ सर्वबाधाप्रशमने वसध्वं सुखिनः
सदा ॥ दयां कुरुध्वं भो विप्रा मयि संतातिमादरात् ॥ ७३ ॥ शौनकः ॥ एवं मुहुर्मुहुः सर्वे मुनिना भाविता

दून्नानि

त्मना॥विज्ञापिता अपिपुनःपरिपृछमुनीश्वरं॥७४॥स्वदेशागमनेऽतीवसक्ताश्चासन्द्विजोत्तमाः॥
वारयामासतान्सर्वान्दययाबहुधामुनिः॥७५॥उदारैर्वचनैश्चापिसर्वदातिथिपूजकाः॥ए
वंनिवारितास्तेवैज्ञात्वामुनिहृदिस्थितं॥७६॥एकत्रमिलिताश्चैवव्याजमन्योन्यमादृताः॥मं
त्रयित्वामाययाचमंत्रितागोजरान्विता॥७७॥सागत्वासर्वसस्यानितपःसंवर्धितानिच॥
अशेषंभक्षयित्वायपुनरत्तुंमुनेर्दमं॥समागतासौरभेयीसमाधिस्थस्यवैतदा॥लिलेहजिह्व
यांगानिवक्त्रेसम्मितयाततः॥विसृष्टवान्मुनिःश्रीमान्समाधिंकरुणाकरः॥वारयामासतां
वीक्ष्यहुंकारेणात्मविघ्नदां॥८०॥तावन्मात्रेणसाप्राणान्विजहावविलंबितं॥अथतेमिलिताः
सर्वेद्विजामायाविमोहिताः॥८१॥अन्योन्यमूचिरेतेनगौतमेनदुरात्मना॥गोर्हतागौर्हता
चेतिनिर्घृणाब्राह्मणाधमाः॥८२॥मिथ्याभिशापवक्तारःस्वदेशागमनोन्मुखाः॥तैःछ
न्नंकपटंसर्वंविज्ञायमुनिसत्तमः॥८३॥परंविस्मयमापन्नःक्रोधेनमहतापिच॥संतप्त

८

चेताः दुर्मर्षः प्रलयानलसन्निभः ॥ ८५ ॥ तानेतान् लोभसंविष्टान् सशाप ब्राह्मणाधमान् ॥ अ
श्रौतधर्मनिरताः लुब्धाः पापिनः शठाः ॥ परदाररता नित्यं परपाकोपजीविनः ॥ दुष्ट
प्रतिग्रहसक्ता याचकाः पाचकास्तथा ॥ ८६ ॥ पूजकाः क्षेत्रवाणिज्यारामजीविनः ॥
भृतकाध्यापिनः सर्वे भवंतु ब्राह्मणाधमाः ॥ ८७ ॥ याजकाः x असूयादंभसंविष्टान्त द्यू त्ना
तनृत्यसमन्विताः ॥ कामलोभपरिक्षीणां ॥ सर्वदान्योन्यनिंदकाः ॥ ८८ ॥ आततायिपथासक्ता
श्छद्मपैशुन्यवर्तिनः ॥ असन्मार्गप्रवक्तारो भवंतु ॥ ८९ ॥ कन्यागोसुतसावित्रीगजाश्वा ॥३२॥
नां च विक्रयं ॥ तथान्ये धर्मतीर्थानां कुर्वंतु ॥ ९० ॥ श्रौतस्मार्तेष्वनर्हाणामयाज्यानां च या
जकाः ॥ अधर्मनिरताः सर्वे भवंतु ॥ ९१ ॥ शिवभस्मनि रुद्राक्षे शिवनाम्नि शिवालये ॥ शिवभ
क्ते शिवक्षेत्रे शिवस्यैव तु पूजने ॥ ९२ ॥ शिवधर्मे शिवज्ञाने शिवतीर्थनिषेवणे ॥ शिवप्र
सादग्रहणे भवंतु विमुखा द्विजाः ॥ ९३ ॥ कापालपांचरात्रेषु शाक्ते कालामुखे तथा ॥ बौ

बौधार्हते पाशुपते पाषंडेन्येषु वर्त्मसु ॥९४॥ यामले बार्हते चैव तंत्रे भागवते तथा ॥ वैखानसे गारु
डे च श्रद्धां कुर्वंतु भो द्विजाः ॥९५॥ त्रिशूलं च तुरस्त्रं वा वेणुपत्राकृतिं तथा ॥ पुंड्रां नरं वर्त्तुलं च श्र
द्धया चरंतु द्विजाः ॥९६॥ हीनवर्णाख्यया हीनरूपेण श्रद्धया तथा ॥ विख्याता नास्तिका भवेयुश्च भवं
तो ब्राह्मणाधमाः ॥९७॥ श्रुतिस्मृत्युदितान् धर्मान् धनलोभजिघृक्षया ॥ शूद्रेभ्यश्च परार्थं
च प्रयच्छंतु सदा द्विजाः ॥९८॥ हीनावर्णाचाररताः श्रौतधर्मविवर्जिताः ॥ काम्यकर्माणि चोद्युक्ताः भ
वंतु ॥९९॥ युष्मदन्वयसंभूता ये सर्वे ब्राह्मणाधमाः ॥ मदुक्तेन च शापेन भवेयुर्वैरागाः सदा ॥१००॥
शौनकः ॥ मुनींद्रेणाभिशप्ताश्च द्विजा दुष्पथगामिनः ॥ स्तद्दं राजास्तथैवासन् स्वस्वकर्मानुसारतः ॥१॥
पश्चात्तापमनुप्राप्तास्ते शु किंचित्तमन्वयुः ॥ भूयसा प्रणिपातेन मनोवाक्कायकर्मभिः ॥२॥ प्रसादयि
त्वाथ मुनिं गौतमं तेऽभ्यपूजयन् ॥ तोषयामासुरूचुस्तं शापस्यांतमभीप्सवः ॥३॥ मुनेऽस्माकं विद स्यां
ग्धानां शापेनाशुचिवर्तिनां ॥ शापमुक्तिं च कथय तस्मात्पापाद्विमोचय ॥४॥ गौतमः ॥ यदुक्त

पूर्वेन सर्वमन्त्रेन भवेत्पुनः॥ मद्भक्तिभावितान्युष्मान्वक्ष्येहं मुक्तिसाधनं॥५॥ विश्वाधिको
नियंता च रुद्रो महर्षिरजयो महान्॥ यः शिवः सर्वभूतानां स्त्रष्टा पाता निसर्गहृत्॥६॥ संसार
मोचकं सांबं तं भजध्वं मुमुक्षवः॥ शांताश्च वीतरागाश्च त्यक्त्वा सत्यया जितेंद्रियाः॥७॥ बहुनो
क्तेन किं साक्षाद्भक्त्या चानन्यया सदा॥ इति तान्शासयित्वाथ समाधिमगमत्पुनः॥८॥ गौ
नकः॥ कौटिल्यकर्मणाद्येते ब्राह्मणाः प्राप्तकिल्बिषाः॥ एवमेव भृगोः शापात्क्रूयव शापा
न्मुनीश्वराः॥९॥ दुर्वाससो मुनेः शापात्कुपितस्य महात्मनः॥ दधीचस्य मुनेः शापादुपमन्यो
श्च शापतः॥१०॥ वीरभद्रस्य शापाच्च रौद्रादस्य महात्मनः॥ विप्राणां दाक्षिणात्यानां पापोप
हतचेतसां॥११॥ शिवे भस्मनि रुद्राक्षे वैदिके नियतकर्मणि॥ किंचिद्ध्यानास्तिकता विद्यते न
हि पापिनां॥१२॥ अतो जैनं पापमूलं त्याज्यं वै पापभीरुणा॥ सर्वदा सत्वभावेन प्राप्यं वै

परमंपदं ॥१३॥ यः श्राव्यमानुषवपुः परमेश्वरस्य यात्रां कथां च भजनं प्रकरोति नित्यं ॥ तस्यैव सर्वपुरुषा
र्थमनोरथाश्च सिध्यंति तत्क्षणमनंगहरप्रसादात् ॥१४॥ इति श्रीस्कांदे सिंह्याद्रिखंडे स्वायंभुवे उत्त
रभागे इषुपातरामक्षेत्रे वर्णने द्वादशोध्यायः ॥ छ ॥ ॥ छ ॥ ऋषयः ॥ विचित्रमिदमाख्यानं श्रुत
मस्माभिरादितः ॥ त्वत्प्रसादान्मुने भूयो न तृप्यामो वयं तथा ॥१॥ अतर्कितप्रभावेण सर्वज्ञेनांतरा
त्मना ॥ स्वातंत्र्येच्छानियंत्रा च भार्गवेण महीयसा ॥२॥ संस्कृतायेपि कैवर्त्ताः पूर्वपुण्यप्रभावतः ॥ ते
षां पुरावृत्तं सर्वं वद विस्तरतो मुने ॥३॥ शौनकः ॥ शृणुध्वं मुनयः सर्वे यूयं तत्सावधानतः ॥ दीं जा
मदग्न्यस्य रामस्य प्रभावमिति च प्रभो ॥४॥ कः शक्नोति च विज्ञातुं पारं योनि[illegible]कुचन्चित् ॥ तथापि कथ न
यिष्यामि तद्वृत्तांतं यथामति ॥५॥ पुरा कश्चिद्द्विजवरो जमदग्निकुलोद्भवः ॥ अजीगर्त इति ख्यातो वेद
वेदांगपारगः ॥६॥ लोभवान्निर्घृणश्चापि सदा दारिद्र्यभाग्भवेत् ॥ तस्य पुत्रास्त्रयो जाताः श्रुतिशा
स्त्रविशारदः ॥७॥ कस्मिन्कालेपि वैजार्षिर्यज्ञं समुपचक्रमे ॥ हरिश्चंद्रस्तमागत्य पुत्रमेकमयाचत ॥८॥

रा

तेनक्रीतंमध्यसुतंनीत्वाराजामखालये॥यूपेद्विजसुतंतौबध्वातथाक्रतुमकारयत्॥९॥यज्ञार्थमागताः
देवाःप्राकुस्तेराजसत्तमं॥राजन्नालंभनीयोसौत्वयाविप्रसुतोयदा॥१०॥तदास्माभिर्हविर्भागंभुक्त
मेवनसंशयः॥इत्युक्त्वादायतंविप्रंमोचयित्वामुदान्विताः॥११॥देवैर्गृहीतइतितैर्देवराता
भिधानतः॥विख्यातोमुनिवर्यश्चततोदेवर्षिभिस्तुतः॥१२॥यज्ञभागावशिष्टश्चदक्षिणा
र्थप्रकल्पिताः॥राज्ञानिवेदितश्चायंगाधिराजसुतायवै॥१३॥विश्वामित्रमुवान्विदंदेवरा
तस्तदानघाः॥देवरातः॥वरतंतोममगुरोमुनीनांतपसांनिधे॥१४॥पुत्राणांशतसंख्या
नांतेषांमध्येत्वप्रभो॥ज्येष्ठोवाथकनीष्ठोवागच्छेयोहंमुनिपुंगव॥१५॥मध्यस्थःसर्वदाथा
मास्मिस्वामिन्त्वदनुशासनात्॥इतिश्रुत्वावचस्तस्यदेवरातस्यधीमतः॥१६॥द्विधाभूता
श्चयेपुत्रामातृद्वयविभागतः॥पप्रच्छप्रथमंतेषांकनिष्ठोदरजान्सुतान्॥१७॥विश्वामित्रः॥
ममाज्ञयापिपरमंस्वज्येष्ठंचाधिंथपुत्रकाः॥दातव्यमस्मैपुत्रायदेवरातायधीमते॥१८॥

इत्यनुज्ञापिताः पुत्राः प्रत्यूचुः पितरं तदा ॥ मोहगर्वाभिसंपन्नाः मूढाः पारुष्यकं वचः ॥१९॥
पुत्रा ऊचु ॥ कोयं कस्मादागतश्च क्रीतलब्धोप्यकिंचनः ॥ असदृश्यायमादाय ज्येष्ठत्वं परि
कल्प्यते ॥२०॥ रूपलावण्यसंपन्नाः कं चाल्पमतिमूढधीः ॥ महदैश्वर्यसंपन्नैर्विद्यादानप
रैः सह ॥२१॥ मातृतौ रुच्चैकैर्वा पिसोयं ज्येष्ठ्यं कथं भवेत् ॥ इति तेषां वचः श्रुत्वा दुर्वृत्तानां
दुरात्मनां ॥२२॥ कौशिकोयमुनिश्रेष्ठः क्रुधः कालानलोपमः ॥ शासनोल्लंघितान्पुत्रा
न्शशापातीवदुस्तरं ॥२३॥ कौशिकः ॥ पौंड्रकाद्रविडाश्चौड्राः कांबोजा यवनाः शकाः ॥ पाल्ह काः
वाः पारदाश्चीनाः किराता दरदास्तथा ॥२४॥ मुखबाहुरूजातानां या लोके जातयो बहिः ॥
कुंतलाश्च पुलावेना अवंष्ठा विध्यसास्तथा ॥२५॥ कारैवारा आवर्ताश्च माधूकाः करणास्तथा ॥
मल्लावैदेहिकाः कांतावत्सका उल्मुकास्तथा ॥२६॥ शिलींध्राकुररावैणास्तौलिका आवर्तास्त
था ॥ वैतालिका अज्यपालाः मैत्रेयाककुविंद्काः ॥२७॥ पुष्यन्नोखरका रूषावाटधानाः कु

त्रीलकाः॥ विजन्मानोधीवराश्चभज्ज्याः प्रकुटकास्तथा॥२८॥ मंदाः कुकुटकाव्याधा कंटकाः पुक्क
ल्कसाश्चये॥ अयोगवामंडलकाः पौष्टिका अर्धशीरिणः॥२९॥ इत्यादयोपिसांकार्याः प्रातिलो
म्याश्चजातयः॥ अवद्यजन्मभाजः स्युः सत्वधर्मबहिष्कृताः॥३०॥ येन्येसुपुत्राः पंचाना सत्व
धर्मरताः सदा॥ सस्याज्ञापालितानित्यं सुशीलाविगतकल्मषाः॥३१॥ शांतं दयालुंपितरं
धीरं शरण्यमाययुः॥ स्तुतिं कृत्वाथबहुधादंडवत्पतिताभुवि॥३२॥ देवरातायपुत्राय
ज्येष्ठत्वंकौशिकोमुनिः॥ तेनयेभ्यः सकाशाद्धदापयामाससादरं॥३३॥ अथतेप्राति
संयुक्ताः पुनरूचुः प्रियं वचः॥ योदत्तोविबुधैः पूर्वैरत्रोमहर्षिर्मुनिवंदितः॥३४॥ सतुवा
चस्पतिंजेतावेदवेदांगपारगः॥ मान्योसौसर्वदास्माभिः पूज्यश्चतपसांनिधिः॥३५॥ तत्प्र ॥३५॥
सादाद्धरीयंश्चजातोयंतवपुत्रकः॥ इतितेषांवचश्श्रुत्वाददौबहुविधान्वरान्॥३६॥ श्रु
ताध्ययनसंपन्नायज्ञदानरताः सदा॥ सत्कर्मासत्यलोभाश्चवीतगर्वागतस्पृहाः॥३७॥

त्रिविकेशरण्या नित्यं रुद्राक्षालंकृतास्सदा ॥ शिवपूजोत्सुका नित्यं भस्मोद्धूलनतत्पराः ॥ ३८ ॥ विशु
द्धहृदया यूयं भवता नल्मवृत्तयः ॥ इति दत्त्वा वरान् तुष्टो विश्वामित्र उदारधीः ॥ ३९ ॥ यत्रोपदग्धाः
पंचाशत्तनया मदमोहिताः ॥ तेषां मध्ये केचिदासन् विवेकवशावर्तिनः ॥ ४० ॥ पूर्वसंस्कारयोगात्ते
पितरं विनयं वचः ॥ ऊचुरस्मान् गुरो स्वामिन् शापान्मोचय मोचय ॥ ४१ ॥ पश्चात्तापगतान् दी
नान् शरण्यागतकल्मशान् ॥ इत्युक्तः कौशिक ऋषिः पुनराह मुनीश्वरः ॥ ४२ ॥ विश्वामित्रः ॥ म
योक्तं यद्वचस्तच्च नान्यथा भवति ध्रुवं ॥ वक्ष्याम्युपायमेकं च युष्मदुद्धरणाय वै ॥ ४३ ॥ यदा श्री भगवा
न्विष्णुर्लोकत्रयहितेरतः ॥ क्षत्रियाणां विनाशाय प्रादुर्भवति भार्गवः ॥ ४४ ॥ मुनिरूपि महान्यो
गी योगी नांत्हृदये वसन् ॥ युष्माकं प्रातिलोम्यानां दासरस्योपजीविनां ॥ ४५ ॥ तथापि मत्प्रसा
दाच्च जातिस्मृत्यनुयायिनां ॥ स रामो जामदग्न्यश्च प्रोद्धर्त्ता करुणानिधिः ॥ ४६ ॥ विप्रत्वं विनियो
का च स्वक्षेत्रे स्थापयिष्यति ॥ गयायां स्थापिताः पूर्वं ब्रह्मणा निर्मिता यथा ॥ ४७ ॥ तन्नाम्ना विप्र

ताः पूज्याः पित्रर्थे ब्राह्मणास्तथा ॥ एवमुक्त्वा मुनिवरस्ततो ध्यानपरोभूवत् ॥ ४८ ॥ ऋषयः ॥ केयं गया
स्थापिताः केयस्यां वै ब्राह्मण्या पुरा ॥ पित्रर्थं निर्मिता विप्राः शप्ताः केनैव हेतुना ॥ ४९ ॥ तत्सर्वं श्रो
तुमिच्छामः कृपया वद शौनक ॥ सर्वसि महाभाग सर्वतत्वार्थकोविद ॥ ५० ॥ शौनकः ॥ अत्रैवोदा
हरंतीमां कथां पापापनोदिनीं ॥ सनत्कुमारदेवर्ष्योः संवादः प्रथितो यदा ॥ ५१ ॥ इदानीं कथयिष्या
मि श्रोतृणां वः समासतः ॥ सनत्कुमारो भगवान्यत्रास्ते सर्वधर्मवित् ॥ ५२ ॥ नारदः प्रययौ श्रीमा
न् गयायां सुरवंदितः ॥ तमागतं मुनिं दृष्ट्वा विधिज्ञोयमपूजयत् ॥ ५३ ॥ वरासनस्थितश्चैव गतश्र
मउदारधीः ॥ सनत्कुमारं प्रपेछ गयामाहात्म्यमुत्तमं ॥ ५४ ॥ नारदः ॥ कोयं गयासुरः कस्माज्जा
तं तद्देहपावनं ॥ तन्नाम्ना कथितं कस्माद्गयाक्षेत्रं महामते ॥ ५५ ॥ तत्सर्वं श्रोतुकामाय ब्रूहि मे
मुनिपुंगव ॥ संप्रार्थितः प्रत्युवाच नारदं मुनिपुंगवं ॥ ५६ ॥ सनत्कुमारः ॥ ससर्ज हि प्रजाः सर्वाः
ब्रह्मा वृंदारकाधिपः ॥ असुरेणतु भावेन दानवानसृजत्पुरा ॥ ५७ ॥ सौमनस्येतु भावेन देवानि न

र्मितवान्वभुः ॥ गयासुरो महासत्वो महाकायो लिदर्पवान् ॥ ५८ ॥ तस्योन्नतिं योजनानां सपादं च
शतं स्मृतं ॥ पीनः षष्टिर्योजनानां श्रेष्ठः पूज्यतमस्तथा ॥ ५९ ॥ सोयं कोलाहलाद्रौ च तपस्तेपे सु
दारुणं ॥ त्रिदशाः स्तापिताः सर्वे तत्तपोज्वलनेन हि ॥ ६० ॥ ब्रह्मादयः सुरगणास्तस्मै दातुं वरान्य
युः ॥ प्रोचुश्च वने चेचारु दनुजेंद्रं मुदान्विताः ॥ ६१ ॥ देवा ऊचुः ॥ त्वत्तपोवन्हिना तप्तं दैत्य स्थां
स्थावरजंगमं ॥ किमर्थं दानवेंद्र त्वं तपसे यन्मनोरथं ॥ ६२ ॥ वर्तते त्वद्धृदि तत्सर्वं वरं ब्रूहि गयासु
र ॥ इति श्रुत्वा वचस्तेषामिदमाह गयासुरः ॥ ६३ ॥ गयासुरः ॥ यदि तुष्टाश्च सकलाः देवता
मत्कलेवरं ॥ सर्वाभ्यः सरिद्भ्यश्चैव सर्वतीर्थाच्छिलोच्चयात् ॥ ६४ ॥ क्षेत्रेभ्योति पवीत्रेभ्यो देवेभ्य
श्च विशेषतः ॥ सर्वेभ्यश्च मुनिभ्यश्च पवित्रं चास्तु सर्वदा ॥ ६५ ॥ इति संप्रार्थिता देवास्तथैव भव
ति ध्रुवं ॥ इति दत्वा वरं तस्मै देवाः जग्मुर्दिवं प्रति ॥ ६६ ॥ तदारभ्य नराः सर्वे दध्वा तं दैत्यपुंगवं ॥ स्व
स्त्रा च ब्राह्मणा साकं सप्तलोकं समागताः ॥ ६७ ॥ निवसंति स्म सततं पितृभिः सहितास्तथा ॥ लोक

त्व

त्रयस्यसंस्थिति:शून्याभूद्यामिनीपुरी॥६८॥पुरुहूतादिभिर्धर्मंतत्कोद्रुहिणंययौ॥त्वयादत्तोधिकारोमे
ह तंगयाख्यपितामह॥६९॥यमेनसाकंब्रह्मापिशिवकेशवयोस्तत:॥निकटंचसमासाद्यतद्वृत्तांतमु
वाचह॥७०॥अथतावूचतुर्वाचंब्रह्माणंससुरंतदा॥गयासुरंप्रार्थयस्वभोब्रह्मन्नूतंस्वविग्रहं॥७१॥
यज्ञार्थंदेहिशीघ्रंतेशरीरंमह्यमादरात्॥इत्याज्ञांशिरसाधृत्वानत्वाब्रह्मापुनर्ययौ॥७२॥गयासुरंम
हादैत्यंस्थूलकायमपश्यत॥गयासुरोप्यतंदृष्ट्वाब्रह्माब्रह्माणंविधिवत्तदा॥७३॥समागतंचसं
पुज्यविधिज्ञ:प्रश्रयान्वित:॥गयासुरोब्रवीद्वाक्यंत्रिदशै:सहितंविधिं॥७४॥युष्मद्दर्शनमात्र
णसर्वंप्राप्तंमयाध्रुवं॥दृष्टानितानिबहुधासेवितानिमयानघ॥७[illegible]॥पवित्राविचयज्ञार्थंननुमेत्व
च्छरीरत:॥अत:प×यदर्थमागतोब्रह्मन्नूतत्कार्यंकरवाणि॥७५॥ब्रह्मापृथिव्यांसंतितीर्था ॥रंप॥
निदुर्लभानिबहूनिवै×वित्रंत्वद्देहंमह्यंदेहिक्रतुहेतवे॥७७॥गयासुर:॥पद्मसंभवधन्यो
हंयद्देह:प्रार्थ्यतेत्वया॥सर्वेषामुपकाराययतोवश्यंभविष्यति॥७८॥इत्युदीर्यमहादैत्योऽस्व
पद्भूमौगयासुर:॥कोलाहलाद्रिशिखरेयातुधानीदिशांभूतित:॥७९॥शिर:कृत्वोत्तरेदेशे

भ

पादौप्रासार्यद्दक्षिणे॥यज्ञार्थीद्रुहिणश्चैवकारयित्वामखालयं॥१०॥समासादितसंभारोमानसान्
त्विजोऽसृजत्॥तैःसाकमकरोद्योगंगयासुरशरीरके॥११॥ऋत्विग्भ्योदक्षिणांदत्वाभूयसीं
तुष्टिमानसः॥क्रतुंसंपाद्यविधिवत्स्नात्वाचावभृथेविधिः॥१२॥यज्ञवाटंसुरैःसार्धंसमागम्यग
यासुरं॥चलितंचतंदृष्ट्वाब्रह्माधर्ममुवाचह॥१३॥गत्वागृहेधर्मशिलांसमानीयचसत्वरं॥दे
त्यराजस्यशिरसिनिवेशयममाज्ञया॥१४॥तथाकरोन्निश्चलार्थंतदाज्ञावशगःपुनः॥शिलायां
धारितायांतुसशिलश्चासुरोऽचलत्॥१५॥पुनःसंचकितोभूत्वाब्रह्मालोकपितामहः॥देवान्नूचेयथश
क्रादीन्शिलायांनिश्चलाःसदा॥१६॥तिष्ठंतुनिश्चलार्थायतथेत्युक्त्वाचतेस्थिताः॥देवानेलक्ष
यित्वाथतथापिचलितोसुरः॥१७॥ब्रह्मादयःसुरगणाःव्याकुलंसमुपस्थिताः॥वैकुंठाधिप
तिंविष्णुमाययुःशरणंतदा॥१८॥तत्रागत्यमहाविष्णुःशिलायांवैस्थितोभवत्॥जनार्दनाभि
धानेनपुंडरीकाक्षनामतः॥१९॥शिलायांनिश्चलार्थंचस्वयमेवगदाधरः॥आद्ययागदया
चासौयस्मादैसःस्थिरीकृतः॥२०॥हरिणासंस्थितश्लितस्माद्वादिगदाधरः॥कैलासादाग

तो रुद्रो बहुरूपेण संस्थितः ॥९१॥ कपर्दस्वाम्यसिद्धेशः सोमनाथः प्रभेश्वरः ॥ कोटीशश्चैव रुद्रेशो
ब्रह्मेशस्तत्र संस्थिताः ॥९२॥ निश्चलार्थं पञ्चधासीत्तच्छीलायां प्रपितामहः ॥ पितामहः पल्व
लीशः केदारः कनकेश्वरः ॥९३॥ विनायकः स्वयं तस्थौ गजरूपी गयासुरे ॥ उत्तरार्को दक्षिणार्को
गयादित्यस्त्रिधा रवि ॥९४॥ लक्ष्मीः सीता तथा गौरी मंगला च सरस्वती ॥ सै गायत्री चैव सावित्री त्रि
संध्या त्रिपदात्मिका ॥९५॥ इंद्रादयो देवगणाः स्वांशतो बहवः स्थिताः ॥ गयासुरोब्रवीद्वाक्यं मंत्रे
षान्विबुधान्तदा ॥९६॥ किमर्थं वंचितोसितं भवद्भिर्यत्सुरैरपि ॥ गदया हरिणा चैव प्रसन्ना [illegible] सं
तुवै सदा ॥९७॥ गदाधरादयः सर्वे प्रस्फूचुः स्तं गदासुरं ॥ वरं ब्रूहि प्रसन्नास्स्मो मनोभिलषितं च
यत् ॥९८॥ सुप्रसन्नांश्च देवान्तान्ययाचे दानवप्रभुः ॥ यावद्धराभूम्यलश्च यावदाचंद्रतारकाः ॥
॥९९॥ तावच्छिलायां तिष्ठंतु ब्रह्मविष्णुमहेश्वराः ॥ अन्ये च सकला देवा मन्नाम्ना क्षेत्रमस्तु च ॥१००॥ ॥३९॥
पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गया शिरः ॥ नंदंतः सर्वतीर्थानि नृणां संतु शुभाय वै ॥१॥ स्नानानि
र्वपणादीनां पिंडदानं विशेषतः ॥ फलाधिकं पितॄणां च त्वात्मनः पिंडदानतः ॥२॥ तर्पयिष्यंति

सततंब्रह्मलोकमनामयं॥युष्मत्प्रसादात्सर्वेलभंतेमुक्तिकांक्षिणः॥३॥इतितस्यवचःश्रुत्वादेवाः
सर्वेमुदान्विताः॥तथास्त्वितिवरंदत्वातत्रैवनिवसंतिहि॥४॥दैसोलब्धवरश्चासौलक्षणान्निश्चलोः
भवत्॥चतुर्दशगणैर्युक्ताविप्राब्रह्मणोमानसोद्भवाः॥५॥यज्ञार्थंनिर्मिताश्चैवयेवैवाजसनेयि
नः॥तेभ्यःसंतुष्टहृदयोददौबहुविधान्वरान्॥६॥ग्रामांस्तूपंचपंचाशत्पंचकोटिंगयांतथा॥
संभृतोपस्करान्दिव्यान्स्वर्णप्राकारसंयुतान्॥७॥गृहान्निर्मायलोकेशःसुरभिंकल्पभूरुहं॥महा
नद्यःक्षीरवाहाःघृतकुल्यादिभिर्युताः॥८॥सुवर्णदीर्घिकाश्चैवबहूनन्नादिपर्वतान्॥अन्यान
मार्गिणोविप्राःभवंतुमदनुग्रहात्॥९॥इतिदत्वावरान्तेभ्योययौब्रह्मास्वकांपुरीं॥विश्वरूपाप
त्तिर्धर्मोनाम्नाराजर्षिसत्तमः॥१०॥धर्मारण्येयदागत्यमहान्यागःकृतस्तदा॥गयावलाख्यविप्रा
स्तेनस्ययज्ञेययाचिरे॥११॥तद्यज्ञधूमनिकरःसत्यलोकंसमावृणोत्॥ज्ञात्वातदानींसर्वात्माब्र
ह्मातत्राययौपुनः॥१२॥अथतानर्थिनोदीनानिवलोभपरान्रुषा॥शशापब्राह्मणान्सर्वा
न्नतृप्तिमनसस्तदा॥१३॥कामलोभपरायूयंकृतवंतःसमर्थिषु॥अन्येषुयाचनांचैवमद्दत्तेष

खिलेषु च ॥१४॥ तस्मादतृप्तिकामाश्च सर्वदा भवत द्विजाः ॥ विद्याविरहिताश्चैव प्रभवंतु शिला
मयाः ॥१५॥ अन्नाद्र्योघ्नतवहा सरितश्च जलाशयाः ॥ मृण्मयाश्च गृहाः सर्वे यदिच्छथ नश्य
तु ध्रुवं ॥१६॥ एवं शप्ता ब्रह्मणा ते प्रार्थयंतो ब्रुवं नजं ॥ पूर्वं दत्तं त्वया यच्च तत्सर्वं शापतो गतं ॥
॥१७॥ इदानीं जीवितार्थं च प्रसादं कर्तुमर्हसि ॥ त्राता त्वदन्यो भगवन्कुतोस्माकं सदा भवेत् ॥
॥१८॥ इति संप्रार्थितो ब्रह्मा प्रोवाचेदं दयान्वितः ॥ तीर्थोपजीविका यूयं माचंद्रार्कं भविष्यथ ॥१९॥
यो युष्मान्पूजयिष्यंति गयायामागतान्नराः ॥ हव्यकव्यादिभिर्दानैस्तोषयंति च सादरं ॥२०॥
तेषां च पितरः स्वर्गं यास्यंति निरयालयात् ॥ ब्रह्मणा शासिताश्चैते तथैवासन्मुदान्वि ॥२१॥
ताः ॥२१॥ अतः सतां गुरूणां च महतामपि यत्नतः ॥ अज्ञा नोल्लंघितव्या च भूतिकामैर्नि
रंतरं ॥२२॥ इति श्रीस्कांदे महापुराणे सिंह्याद्रिखंडे स्वायंभुवे उत्तरभागे रामक्षेत्रवर्णने
भार्गवीयाख्यानवर्णनं नाम त्रयोदशाध्यायः ॥१३॥ छ ॥ ॥छ॥ ॥छ॥ शौनकः ॥

पुराकश्चिद्द्विजवरोवेदवेदांगपारगः॥तपोनिष्ठःप्रशांतश्चकरहाटंसमाययौ॥१॥कुहीन्याःकृ
ष्णवेण्याश्चयत्रसंगोमहानभूत्॥जातीचंपकचांपेयकेतकीकुमुदोत्पलैः॥२॥कल्हारसेवंति
कुंदबंधुकैर्यूथपुष्पकैः॥एलालवंगलवलीमरीचशालपत्रकैः॥३॥अन्यैर्नानाविधैर्वृक्षैः
फलपुष्पसुशोभितैः॥विचित्राभिर्लताभिश्चकुसुमैर्विविधैस्तथा॥४॥मंदारपनसाश्व
त्थपिचुमंदकपित्थकैः॥जंबूम्रकदलीपूगनारिकेलकदंबकैः॥५॥प्रियंगुभूर्जशालूरप्लक्षो
दुंबरशाल्मलैः॥न्यग्रोधदंतशठकाम्लवेतसकरंजकैः॥६॥शम्याकतालहिंतालकोविदा
रक्तमालकैः॥तिंत्रिणीरूचकैःश्रूरैःकोलनीपाश्वमारकैः॥७॥निम्नयानपुलिनैश्चनदीभिश्च
प्रवाहिभिः॥कासारैर्निर्झरैश्चैवतडागारामभूरिभिः॥८॥हंसकारंडवैश्चैवपातालवनकपोलकैः॥
चक्रवाकैर्मयूरैश्चलक्ष्मणैश्चचकोरकैः॥९॥अनेकपक्षिसंरावकूजितेचशुभप्रदे॥विराजतेव
नंयत्रसुच्छायंचमनोरमं॥१०॥तत्तीरेनिवसंतिस्मत्र्यवरामुनिपुंगवाः॥आश्रमाबहवःसंतित्र

ब्यसंघसमाकुलाः ॥११॥ योगिनो वैरभावं च त्यक्त्वा तिष्ठंति यत्र च ॥ तपस्तत्यामुनिवरः सोयं योग
विदांवरः ॥१२॥ माघेत प्रशिलायां वैपं चाग्नौ माधवे तथा ॥ शुचौ वर्षे पर्वताग्रेशयनं चोपवेश
नं ॥१३॥ जलाशये चावगाहं कृत्वा लोकानूत तापसः ॥ यत्रोत्तरा भगवती संगमेश्वरसन्निधौ ॥
॥१४॥ विबुधैः पूजिता नित्यं वरदा चाविराजते ॥ पंचाक्षरीजपन्नित्यं रुद्राध्यायमतंद्रितः ॥१५॥ त
मीश्वरं पूजयित्वा भस्मरुद्राक्षभूषितः ॥ स्वल्पाहारो वीतरागो गतलोभो जितेंद्रियः ॥१६॥ यम
नियमासनादिंश्च सिद्धानां साधकः सुधीः ॥ सायं सरोरुहाणां च कंदानत्ति तपोनिधिः ॥१७॥ ए
वमाराधयीत्वा यं समाधिमगमन्मुनिः ॥ प्रशांतहृदयाविष्टो विगतक्लेशपंचकः ॥१८॥ तद्ध्यान
निरतो योगी शमाद्यष्टांगयोगवित् ॥ कदाचिदपि देवेशा उत्तरासहितो विभुः ॥१९॥ तद्भक्त्या
च मुदं प्राप्तः प्रादुरासीज्जगत्पतिः ॥ उवाच वचनं श्रीशामेघगंभीरया गिरा ॥२०॥ वरं वरय हे ब्र
ह्मन्तुष्टोहं तव भक्तितः ॥ मनोभिलषितान्दास्ये सर्वानर्थान्मुनीश्वर ॥२१॥ इति श्रुत्वा ॥४०॥

वचस्तस्यदेवदेवस्यशूलिनः ॥ समाधिंचविसृज्याथस्तुतवान्परमेश्वरं ॥ २२ ॥ मुनिः ॥ नमोनमःका
रणकारणायपरापराणांपरमेश्वराय ॥ त्रयीमयायात्रिगुणात्मकायलोकत्रयातीतमहेश्वराय ॥ २३ ॥
अणोरणीयान्महतोमहीयान्नात्मागुहायांनिहितोऽस्यजंतोः ॥ तमक्रतुंपश्यतिवीतशोकोधातुः
प्रसादान्महिमानमीशं ॥ २४ ॥ हिरण्मयंपुरूषभानुमंडलेस्थितंत्रिकालात्मकसांबमव्ययं ॥ भर्गंस
हस्रांशुमयंसुमंगलंत्वांसंततंनौमिकृपालुमीशं ॥ २५ ॥ उमासहायंपरमेश्वरंविभुंत्रिलोचनंत्वांप्र
णवात्मकंभजे ॥ २६ ॥ विश्वाधिकंविश्वगभूतयोनिंसमस्तसाक्षिंतमसःपरस्तात् ॥ २६ ॥ तमीश्व
राणांपरमंमहेश्वरंतंदेवतानामाधिदैकंमहांतं ॥ पतिंपुराणंपुप्रथमंपुरस्ताद्विदामिदेवंभुवने
शमीड्यं ॥ २७ ॥ त्वमादिदेवोभगवान्त्वमेकस्त्वमेवकर्त्ताभुवनस्यसर्वतः ॥ त्वमीश्वरोबंधाविमो
क्षयोस्त्वंगुरुःप्रपन्नार्त्तिहरोमनीषिणां ॥ २८ ॥ नीलग्रीवनमस्तेस्तुसर्वाघौघनिसूदन ॥ म
स्कंजयनमस्तेस्तुकालकालांतकप्रभो ॥ २९ ॥ विष्णुब्रह्मादिदेवैर्यत्प्राप्तुंत्वत्पादपंक

जं॥ भवेच्च दुर्लभनरं सर्वाभिष्टप्रदायकं॥२०॥ तदद्य त्वत्प्रसादाच्च लब्धं धन्योऽभवं ततः॥ जी
वितं धन्यमेवाद्य कुलशीलं सद्म मम॥२१॥ पाहि पाहि कृपासिंधो दीनार्त्तं शरणागतं॥ नान्य
दिच्छामहं देव देहि मे त्वत्पदांबुजे॥२२॥ भक्तिं त्वाश्वतिकां चैव वत्स पूजायां सदानघ॥ अविश्वा
सो भवेन्नैव भस्मरुद्राक्षधारणे॥ माभूत्प्रमादः शैवानामर्चने च सदा मम॥ त्वद्ध्याने भजने चै
व व प्रमादो न हि कुत्रचिद्भवेत्॥२४॥ एवमादीन्वरांश्चापि तदा मुनिरयाचत॥ तस्यार्थितान्वरान्देवो द
त्त्वा चांतरधीयत॥२५॥ अथ ते मुनयः सर्वे नारदाद्याः सुरर्षयः॥ बहुभिः स्तुतिभिश्चैवनं स्तु
त्वा प्राहुः समागताः॥२६॥ देवदेव महेशस्य प्रसादाच्च मुने त्वया॥ सर्वार्थसिद्धिः संप्राप्ता तपसा ॥४२॥
शुभकर्मणा॥२७॥ यतः कमलकंदानां भक्षणात्सुंदरांगभाक्॥ करहाट इति ख्यातस्त्वणाबिं
दुसमो भव॥२८॥ इति नाम ददुस्तस्मै संययुः स्वाश्रमं प्रति॥ ततः प्रभृति विख्यातः करहाटो म
हामुनिः॥२९॥ रामक्षेत्रमुपागम्य स्वनाम्ना लिंगमुत्तमं॥ स्थापयामास विधिवत्तत्र संस्थि

तवान्मुक्तिः॥४०॥यस्यदर्शनमात्रेणमुक्तोभवतिमानवः॥प्राप्नोतिशाश्वतंस्थैर्यंश्रेयःसर्वज्ञान
विशारदः॥४१॥करहाटेश्वराख्यानंशृणुयाद्भक्तितःसुमा॥४२॥सर्वांसिद्धिंलभतेनात्रकार्या
विचारणा॥४३॥इतिस्कांदेसैंद्येस्वायंभुवेइषुपातक्षेत्रमाहात्म्येकरहाटकेश्वरवर्णनंनामच
तुर्दशोध्यायः॥१४॥छ॥ ॥छ॥ ऋषयः॥रामक्षेत्रेस्थितायेचगरदाब्राह्मणाधमाः॥म
र्त्याश्चगरयोगेनघ्नंतिवैकेनहेतुना॥१॥तेषामाख्यानकंसर्ववदशौनकसुव्रत॥शृणुध्वंमु
नयःसर्वेप्रवक्ष्यामिकथानकं॥२॥शौनकः॥आर्यावर्तेषुदेशेषुसर्वदापुण्यफलस्तुच॥सुनंदायां
नगर्यांवैमित्रयुग्ब्राह्मणोत्तमः॥३॥श्रुताध्ययनसंपन्नोप्रशांतोऽतिथिपूजकः॥प्रसंन्नगुण
संविष्टोवसतिस्मसदारकः॥४॥सुमेधाःसोपदिःशालोदर्भवाहश्चकौंडिलः॥अष्टदृष्टश्चाभिजि
तःसप्रांतेवासिनःसदा॥५॥अस्यशुश्रूषणरतान्कुमारान्ब्रह्मचारिणः॥सर्वान्संशिक्षापय
न्नेतांश्चधनधान्यसमन्वितः॥६॥मनोमयीतस्यभार्याकन्यामेकामजीजनत्॥नामक्रियांचका

रा सो सुरूपां कमलाननां ॥७॥ दिने दिने वर्धते सा कन्या चंद्रकलेव हि ॥ कस्मै देया मया चेति
मनसि व्याकुलोऽभवत् ॥८॥ एतस्मिन्नेव काले तु कौमुंडः सुंदरो युवा ॥ भरद्वाजकुलोद्वाहि
कन्यार्थमगमत्ततः ॥९॥ तं दृष्ट्वा मित्रयुग्विप्रो रूपोदारगुणान्वितं ॥ स्नातकं श्रुतसंपन्नं ह
द्यं प्रीतमनास्तदा ॥१०॥ एकदा शुभकाले तु विवाहमकरोत्ततः ॥ नानाविधोपचारैश्च यथावि
त्तानुसारतः ॥११॥ तौ दंपती तोषयित्वा स्वगृहे समुपाविशत् ॥ एकस्मिन्नपि काले तु शि
ष्यानाहूय मित्रयुक् ॥१२॥ गुरुराज्ञापयामास समिदर्थं वनं प्रति ॥ तैः साकमपि कौमु
डो गतो घोरवनांतरं ॥१३॥ समिदर्थं विहरन्तिं क्रूरेण द्वीपिना तदा ॥ भक्षितो सो द्विजवरो
ययौ कालपुरं प्रति ॥१४॥ वृत्तांतमेवं गुरवे कथयामासुराशु च ॥ तं निनादमुपश्रुत्य
सुरूपा शोककर्षिणी ॥ उरः संताडयामास रुरोदोच्चैः स्वरात्ततः ॥ मूर्छयानष्टसंज्ञा च ॥४२॥
निपपात महीतले ॥१६॥ हाहाकारं कुलवतीं सुरूपा दुःखविह्वला ॥ स्वांके निधायने

त्रांबुमित्रयुक्यपरिमार्ज्यचा॥१७॥वीतरागैर्जितक्रोधैःशांतैर्वेदांतवादिभिः॥समस्तबंधुभिःसा
र्धंमानसंसमत्वंहयत्व॥१८॥ततःसुरूपातनयापितृवेश्मनिसंस्थिता॥सेयंतुरूपसंपन्ना
नीलेंदीवरलोचना॥१९॥सिंहोदरीभंकमलभगंडस्तनविराजिता॥पूर्णेंदुवदनाचैवकृत
मन्मथयौवना॥२०॥स्मरमार्गणधाराभिःखंडितांगीसुगंधिका॥तैःसखाभिःशिष्यगणैः
सहक्रीडावतीयदा॥२१॥ऊचुश्चैनाम्रतंवाक्यमस्माभिर्गुरुबंधुभिः॥खेलनंपरिहासं
चनोचितंतवसुंदरि॥२२॥एतेषांवचनंश्रुत्वामनःखिन्नाभवत्ततः॥मंदास्यानिसं
तस्थासदांतःकामनिर्भरा॥२३॥श्रुताध्ययनसंपन्नोमित्रयुग्ब्राह्मणोत्तमः॥शिष्यानु
ध्यापयन्यत्रस्वाश्रमेसुमनोहरे॥२४॥फलपुष्पभरानम्रतरुगुल्मलतादिभिः॥नानाना
पक्षिसमाकीर्णंकुमुदादिसुगंधिभिः॥२५॥कुसुमैश्चपरागैश्चसुगंधितसरोवरैः॥सं
युतंशीतलच्छायंतदाश्रममनुत्तमं॥२६॥तदानीसमहायोगीगीतार्थयात्रादिपर्यटन्॥
करहाटोमुनिश्रेष्ठस्तपोनिधिःसमाययौ॥२७॥तपोनिधिंविशालाक्षंवीतरागंजि

तेंद्रियं ॥ अथागतं मुनिवरं सभार्यश्च द्विजोत्तमः ॥ २८ ॥ समुत्थाय तथा शीघ्रं दत्वा चेव वरासनं ॥
पूजयामास तं भक्त्या योगिनं गतकल्मषं ॥ २९ ॥ ततः सा विधवा चैव दृष्ट्वा निकटवर्त्तिनं ॥ पा
दौ प्रक्षाल्य यथाविधिवहूरान्नैश्च चतुर्विधैः ॥ ३० ॥ भोजयित्वाथ तं धीरा नमति स्म गतश्रमं ॥
अथ संप्रीतहृदयो मुनिस्तदुपचारतः ॥ ३१ ॥ उवाच वचनं चारुरूपयातामुदारधीः ॥ या
चयस्व वरं बाले यत्ते मनसि रोचते ॥ ३२ ॥ इत्युक्त्वा प्रत्युवाचाथ कामप्राणनतत्परा ॥
सदा मां बाधते चायं मन्मथो दुःखदायकः ॥ ३३ ॥ अतस्तद्दुःखशांत्यर्थं शंसोपायं महत्तरं ॥ ठू
तां प्रत्युवाच योगींद्रः करहारो महातपाः ॥ ३४ ॥ योगींद्रः ॥ वैधव्यसंगताभिश्च स्त्रीभिः
कर्त्तव्यमादरात् ॥ पत्यो मृतेऽपि या योषिद्वैधव्यं पालयेत्क्वचित् ॥ ३५ ॥ सा पुनः प्राप्य
भर्त्तारं स्वर्गलोकं समश्नुते ॥ विधवाकबरीबंधो भर्त्तृबंधाय जायते ॥ ३६ ॥ शिरसो वपनं
~~कार्यं~~ तस्मात्कार्यं विधवया सदा ॥ एकाहारः सदा कार्यो न द्वितीयः कदाचन ॥ ३७ ॥ त्रि
त्रं पंचरात्रं वा पक्षव्रतमथापि वा ॥ मासोपवासं कुर्याच्चांद्रायणमथापि वा ॥ ३८ ॥

वा

भि:

कृछ्रं पराकं कुर्याच्चांद्रा तप्तकृछ्रमथापि वा॥ यवान्नेन फलाहारैः शाकाहारैः पयोव्रतैः॥३९॥
प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं ब्रजेत्॥ पर्यंकशायिनी नारी विधवा पातयेत्पतिं॥४०॥
तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया॥ नैवांगोद्वर्तनं कार्यं स्त्रिया विधवया क्वचि
त्॥४१॥ गंधद्रव्यस संयोगो नैव कार्यस्वयं पुनः॥ तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलो
दकैः॥४२॥ तत्पितुः प्रपितुश्चापि नामगोत्रादिपूर्वकं॥ श्राद्धे षड्देवताः पिंडास्तर्पणानि त
थैव षट्॥४३॥ स्वभर्तृप्रीतैत्रिभ्यः स्वपितृभ्यः स्तथैव च॥ विधवा कारये श्राद्धं यथाकाल
मतंद्रितो॥४४॥ अष्टाब्दात्तु युता किंचिन्न कुर्याद्भर्तृतत्परा॥ इदं पुत्राद्यभावेपि पार्वणा
दीनि सर्वशः॥४५॥ विष्णोस्तु पूजनं कार्यं पतिबुध्या च नान्यथा॥ पतिमेव सदा ध्यायेद्वि
ष्णुरूपधरं परं॥४६॥ यद्यदिष्टतमं लोके पत्युर्वासिसमीहितं॥ तत्तद्गुणवते देयं पति
प्रीणनकाम्यया॥४७॥ वैशाखे कार्त्तिके माघे विशेषनियमंचरेत्॥ स्नानं दानं ती
र्थयात्रां विष्णोर्नामग्रहं मुहुः॥४८॥ वैशाखे जलकुंभाश्च कार्त्तिके घृतदीपकः॥ प्र

पाकार्याच वैशाखे महादेवे गलन्तिका ॥ ४९ ॥ माघे च तिलधेनुश्च देया लोको विशिष्यते ॥
उपानद्व्यजनछत्रसूक्ष्मवासांसिचंदनं ॥ ५० ॥ देयानि द्विजमुख्येभ्यः पतिर्मे प्रीयतामि
ति ॥ एवंविधैश्च विधवा विविधैर्नियमैर्व्रतैः ॥ ५१ ॥ वैशाखांन्कार्त्तिकान्माघानेवमे
वावगाहयेत् ॥ नाधिरोहदनड्वाहं प्राणैः कंठगतेरपि ॥ ५२ ॥ कंचुकेन परीदध्याद्वासो
नविकृतं वसेत् ॥ एभिधर्मैः समायुक्ता विधवापि पतिव्रता ॥ ५३ ॥ पतिलोकमवाप्नो
ति न भवेत्क्वापि दुःखिता ॥ हिंसासूयादंभमोहकामेछानृतभाषणं ॥ ५४ ॥ गीतके
लिपरीहासान्मनसापि न कारयेत् ॥ इति तद्वचनं श्रुत्वा विमृष्टहृदयात्पुनः ॥ ५५ ॥
पप्रच्छ मुनिशार्दूलं विवशा काममोहिता ॥ मुने त्वया यदुक्तं हि नान्यथा भवति ध्रुवं ॥ ५५ ॥
मयासंप्रार्थितं यच्च युक्तायुक्तमथापि वा ॥ ५६ ॥ अवश्यं तत्त्वया दातव्यं यदि चेन्मयि ॥ ५५ ॥
तेस्पृहा ॥ ५७ ॥ आदौ मया याचयस्त्वेति दत्तो वाक्यं महामते ॥ तदन्यथा त्वदीयं तु भवि
ष्यति कथं वद ॥ ५८ ॥ अनिशं बाधतेनंगः सर्वेषां दुरतिक्रमः ॥ अतस्त्वं छमनोपायं

यथाभवतिनहूद।।५९।।इतिसंप्रार्थितश्चैवसर्वतत्वार्थकोविदः।।अभिमंत्र्यददौतस्मैत
नुंकरभकीकसं।।६०।।दैवा~~त्सुरूपाललना~~दृष्टौदोहल्ल तद्गृहीत्वाध्वजाकारंसुरूपा
प्रययौसुदा।।निविश्यैवस्वयोन्यांचहृष्टकामाभवच्चसा।।६१।।दैवात्सुरूपाल
लनादृष्टोदोहलक्षणं।।मुनेर्मंत्रप्रभावाच्चाभवदेतादृशोद्विजाः।।६२।।तेसप्तशिष्या
विख्यातास्इदंकिंपारिहास्यकं।।अन्योन्यंप्रतिवक्तारःसत्राब्दंजहसुर्मुदा।।६३।।
तदिशितज्ज्ञात्वासानारीसंस्मृत्यहृदयेपुरा।।वैरभावंध्रुवनीहंतःरुद्धैवीजिहलगा।।
मात्सर्यंविषसंयोगंकारयामासबालकान्।।हतास्तेद्विजपुत्राश्चहत्यारूपमुपा
गमत्।।६५।।यासगर्भासुरूपातुस्वदेशंविनिवर्त्यच।।देशांतरंसमासाद्यवा
संचक्रेविनिर्भयं।।६६।।अस्याश्चजठरेसप्तजनितास्तनयाःशुभाः।।ताब्रह्महत्या
एतान्वैकुमारान्हंतुमुद्यताः।।६७।।तासांत्रासेनसानारीपुनःशरणमागताः।।
उवाचवचनंभीतारक्षरक्षेतिवैम्यत्रं।।६८।।युष्मभ्यंवांछितंतत्तुददामिहित

भिच्छती॥इत्याकर्ण्यवचस्तस्यास्ताऊचुःप्रीतिपूर्वकं॥६९॥अस्मभ्यंमानुषंदेहं
दानाच्चबलिपूर्वकं॥संतरेरभिवृद्धिस्तेभविष्यतिनसंशयः॥७०॥तथैवह्क
लवत्याश्चकुलवृद्धिरजायत॥अस्मत्तसन्नसुगोत्रेषुसमयाचारपूर्वकं॥७१॥
संस्कारैर्विनियुज्यस्वह्यस्मच्छासनमात्रतः॥इतितद्वचनंश्रुत्वासोच
कारतथैवहि॥७२॥मबलिमध्यापिवंशेषुतेषुकुर्वंतियेनराः॥तेषांसंतति
वृद्धिश्चभवत्येवनचान्यथा॥७३॥अतस्तेगरदाःकेचिद्दैदवद्याइतिविश्रु
ताः॥करहाटादागतायेकरहाटाइतिश्रुताः॥७४॥श्रुताध्ययनसंपन्ना
यज्ञदानरतास्तथा॥पाध्यायिनश्चविप्रायवेदवेदांगपारगाः॥७५॥एतेश्च
साकंव्याजेनदंभलोभान्वितामिथः॥शारीरान्वयमाचक्रुर्गरदाब्राह्म
णाधमाः॥७६॥करहाटादयश्चैवसर्वएतेद्विजातयः॥अन्योन्यविद्वेषसक्ता

रामक्षेत्रमुपाश्रिताः ॥ ७७ ॥ संस्थिता निर्भयापन्नाः सुखिनश्च सदा द्विजाः ॥ इत्थं
तत्सर्वमुदितं करहाटस्य वर्णनं ॥ ७८ ॥ इति श्री० स्वायंभुवे रामक्षेत्रवर्णने करहा
टविप्राख्यानवर्णनं नाम पंचदशोऽध्यायः ॥ १५ ॥ छ ॥ ऋषयः ॥ श्रुताध्ययन
संपन्ना वेदवेदांगपारगाः ॥ अस्त्वबलितब्रह्मचर्या जाता विप्रकुले शुभे ॥ १ ॥ अ[illegible]ः
म: प्रि[illegible]यं किमर्थमिनेसंप्राप्ता राक्षसीयोनिमीदृशी ॥ वैधव्यं सा च बाल्येऽपि
संप्राप्ता केन हेतुना ॥ २ ॥ अस्याः प्रियतमः कोयं तत्सर्वं वद सुव्रत ॥ एतेषां पूर्ववृत्तां
तं मुनेः शुश्रूषतो वचनः ॥ ३ ॥ शौनकः ॥ शृणुध्वं मुनयः सर्वे तद्वक्ष्यामि समासतः ॥ पां
ड्यदेशे पुरा विप्रो निवसन् ब्राह्मणोत्तमः ॥ ४ ॥ मित्रशर्मेति नाम्नाचै विख्यातो मुनि
पुंगवाः ॥ भार्ये द्वे भवतस्तस्य सुरूपा चारुहासिनी ॥ ५ ॥ ज्येष्ठा चाथ कनिष्ठा वै रूपला
वण्यगर्विता ॥ सर्वगीतकलाभिज्ञा युवती स्मरविह्वला ॥ ६ ॥ कलाशास्त्रातिचतु
राव्याजमार्गानुगामिनी ॥ स्वाधीनपतिका चैव पतिस्तद्वशगो भवत् ॥ ७ ॥ अथरू

पवती ज्येष्ठा साधु चैव प्रियंवदा ॥ पतिविप्रीययोगेन नित्यं दुःखवशानुगा ॥ ९ ॥ अपुत्रा चैव
वसा नारी शौकृश्यर्यसत्वाजहावस्तून् ॥ कनिष्ठा स्वैरिणी चाथ नित्यं जाररता भवत् ॥ १० ॥ ए
कस्मिन्नेव काले तु जारस्तद्गृहमागतः ॥ तां मानगर्विता प्रीत्या देहि मे रतिमादरात् ॥ ११ ॥
वै इत्युक्त्वा सतिजग्राह बाहूच मदनातुरः ॥ अथ क्रुधा गौरमुखी करं प्रोत्सार्य दूरतः ॥
निर्भर्त्सयित्वा शयनादुदतिष्ठदनातुरा ॥ ततस्तद्रूपसौंदर्यगुणैर्नित्यं विमोहितः ॥ १२ ॥
संस्मृत्य भर्त्सादुःखान्निःक्षीणांगस्सकालेपतः ॥ अथ कालेन मरणं संप्राप्तो शुभलक्ष
णः ॥ १३ ॥ यस्याः समभिलाषेण हेतुना त्यक्तजीवितः ॥ सोयमस्याः पतिर्भूत्वा परस्त्री
संगदोषतः ॥ १४ ॥ द्वीपिना भक्षितश्चासौ स्वकर्मवशगः पुनः ॥ सेयं सुरूपा भर्त्तारं मो
हयित्वा चवच्छमना ॥ १५ ॥ नित्यं जाररता पूर्वं पंचत्वमगमत्पुनः ॥ कृतांतयातनां भुक्त्वा
नानादुःखप्रदायिनी ॥ १६ ॥ तिर्यग्योनिं समासाद्य बहुकालं पुनस्ततः ॥ अक्षीण
कर्मलेशेन द्विजभार्याभवत्पुनः ॥ १७ ॥ इह जन्मनि व्यैवैधव्यं बाल्येपतदवा

सा॥ अतो दुःशीलगामिन्यो नित्यं पापरताश्च याः॥ छद्मरत्या मोहयंत्यो भर्त्तारं पांसु
लास्तथा॥ सपत्नीभिश्च दस्युत्वमसूयां संतनं पुनः॥१९॥ पारुष्यं कलहं चैव कूटवृ
त्तिं दुरात्मगाः॥ समाचरंति तासां वै निष्कृतिर्न भवेत्ततः॥२०॥ वैधव्यदोषनिरतौ प्रा
प्नुवंत्यशुभं सदा॥ सुचरित्रांगनाभिश्च क्षिपते चानुसूयता॥२१॥ दुःशीलोपि दु
राचारः कामवृत्तो दुरात्मवान्॥ सततं देववद्बुध्या भाव्यते च पतिः सदा॥२२॥ या प्रियं
प्रीणयेत्स्त्री नात्रिलोकी प्रीणिता तया॥ भुंक्ते भुक्ता तथा पत्यौ तस्मिन्नुत्तिष्ठति तिष्ठति॥
निद्रिते च धिनिद्राति प्रथमं परिबुध्यते॥ अनलंकृतमात्मानं पत्युर्नो दर्शयेत्क्वचित्॥२४॥
कार्यार्थे प्रोषिते पत्यौ सर्वमंडनवर्जिता॥ न च तन्नाम गृण्हीयात्तस्यायुष्याविवर्ध
ये॥२५॥ आचार्यं चैव तत्पुत्रं तद्भार्यां दीक्षितं गुरुं॥ पितरं चोपितृव्यं च मातरं मातु
लं तथा॥२६॥ हितैषिणीं च विबुधां श्वशुरं देवरं तथा॥ न ब्रूयान्नामतः साध्वी मा
तुश्च भगिनी तथा॥२७॥ आक्रुष्टापि न चाक्रोशेत्ताडितापि प्रसीदति॥ इदं कुरु

कृतं स्वामिन्नमन्यथामिति चाब्रुवन् ॥२८॥ आहूता गृहकार्याणि त्यक्त्वा गच्छति सत्वरं ॥
पूजोपकरणं सर्वमनुक्तं साधयेत्स्वयं ॥२९॥ नियमोदकबर्हिष्यपत्रपुष्पादि
कं चयन्त् ॥ सेवेत भर्तुरुच्छिष्टमिष्टमन्नफलादिकं ॥३०॥ महाप्रसादमित्युक्त्वा
पतिदत्तं प्रयच्छति ॥ प्रसुप्तं च सुखासीनं रममाणं यदृच्छया ॥३१॥ आतुरेष्वपि
कालेषु पतिं नोत्थापयेत्क्वचित् ॥ रजोवती त्रिरात्रं तु स्वमुखं नैव दर्शयेत् ॥३२॥
स्ववाक्यं श्रावयेन्नापि यावत्स्नाता विशुध्यति ॥ सुस्नाता भर्तृवदनमीक्षेन्नान्यस्य
कस्यचित् ॥३३॥ अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥ हरिद्रां कुंकुमं चैव
सिंदूरं कज्जलं तथा ॥३४॥ सकंचुकं च तांबूलं मंगल्याभरणं शुभं ॥ केशसंस्कारक
बरीकरकर्णविभूषणं ॥३५॥ भर्तुरायुष्यमिच्छंती दूरयेन्न कदाचित्सती ॥३५॥ न चदु ॥४७॥
र्भगिया नार्यासखित्वं कुरुते तु सा ॥३६॥ भर्तृविद्वेषिणीं नारीं न संभाषेत कर्हि
चित् ॥३७॥ नैकाकिनी क्वचिद्भूयान्न नग्ना स्नाति वै क्वचित् ॥३७॥ नोलूखले

नमुसलेनवर्धन्यांदृषद्यपि।।नयंत्रकेनदेहल्यांनैवनोपविशेत्क्वचित्।।उक्त्वाप्रत्यु
त्तरंदद्यान्नारीयाक्रोधनस्वरा।।साश्शुनीजायतेग्रामेशृगालीनिर्जनेवने।।अपवा
दोनवक्तव्यःकलहंदूरतस्यजेत्।।३९।।गुरूणांसंनिधौचापिनोच्चैर्ब्रूयान्नवाहसे
त्।।ताडितातांडितुंयच्छेत्साव्याघ्रीजायतेवने।।४०।।भर्त्तारंयासमुत्सृज्यस्वेष्ट
मश्नातिकेवलं।।ग्रामेसाशुकरीवास्याद्दैभीश्चाविडाशुभा।।४१।।तीर्थस्नानार्थिनीना
रीपतिपादोदकंपिबेत्।।शंकरादपिविष्णोर्वापतिरेकोधिकःस्त्रियः।।४२।।प्रातः
कालेतुयानारीदद्यादर्घ्यंविवस्वते।।सप्तजन्मनिवैधव्यंसानारीनैवपश्यति।।
कृत्वातुमंडलंबाह्येसूर्यंतुत्वाक्षतादिभिः।।पूजयेत्सततंयावैतस्याःस्तुष्यं
तिदेवताः।।४३।।प्रातःकालेतुयानारीशुचिर्भूत्वासमाहिता।।पूजयेद्द्वारदेशं
तुसर्वान्कामान्समश्नुते।।४४।।नददातियदानारीज्येष्ठायैप्रसह्यबलिंप

भुंक्ते चैव यथा प्रीति सा महानरकं व्रजेत् ॥४६॥ अवश्यमेव नारीभिर्ज्येष्ठापा बलिकर्म
णा ॥ प्रीणनं प्रत्यहं कार्यं पुत्रपोत्रधनेप्सुभिः ॥४७॥ नारीषु नित्यं शुचिभूषितासु प
तिव्रतासु प्रियवादिनीषु ॥ अमुक्तहस्तासु सुतान्वितासु सुसंभृतभांडासु बलिप्रि
यासु ॥४८॥ सुमृष्टगेहासु जितेंद्रियासु कलिव्यपेतासु विलोलुपासु ॥ धर्मव्य
पेक्षासु दयान्वितासु स्थिता सदाश्रीर्जगती विधात्री ॥४९॥ द्वारोपवेशनं नित्यं ग
निरीक्षणं वाक्षेण विलोकनं ॥ असत्प्रलाप हास्यं च दूषणं कुलयोषितां ॥५०॥ पानं दुर्जन
संसर्गः पत्या च विरहोटनं ॥ स्वापोन्यगेहे वासश्च स्त्रीणां वै दूषणानि षट् ॥५१॥
भर्त्ता देवं गुरुर्भर्त्ता भर्त्ता धर्मव्रतानि च ॥ तस्मात्सर्वं परित्यज्य पतिमेकं समर्च
येत् ॥५२॥ नित्यस्नान कृला वेणी पूजयेत्सुष्ठवाससा ॥ पूर्वमेव रहोगच्छे द्याव
न्नान्यः प्रबुध्यते ॥५३॥ यतः स्त्रियो बीजभूता धर्माधर्मार्थयोरपि ॥ स

ङ्गिः सधर्मे सततं स्थापयंते मुनिपुंगवाः ॥५४॥ ब्राह्मणाश्चाथ सभैते कृताध्ययनशालि
नः ॥ वासं चक्रुः पूर्वमेव धर्मक्षेत्रे च कुत्रचित् ॥५५॥ तत्रैव ग्रामनिगग्र्हं लोभहादानास्
नेकशः ॥ द्रव्यलोभेन महता वर्धिताशा दुराशयाः ॥५६॥ कदाचिद्दीपिकाकालेन कुरुक्षे
त्रमुपागताः ॥ धनिकैः क्षत्रविट्शूद्रैः स्तत्र दत्तानि भूरिशः ॥५७॥ परार्थमानि रा
रुद्रजपासक्ता स्तपःपराः ॥ कुटुंबं पालयंतिस्म मायावेशमुपागताः ॥५८॥ तुला
पुरुषदानानि गोदानानि सहस्रशः ॥ प्राप्यमानानि निरयं यावज्जीरोमसंख्यया ॥५९॥
धृतानि ते द्विजैश्चैव सदा लोभवशानुगैः ॥ विंध्यदेशमनुप्राप्ताः पथि चौरैर्ह
ताः पुनः ॥६०॥ अनेकदुःखसंतप्ता स्तेऽपि विप्रकुले पुनः ॥६०॥ जाताश्च कर्मले
खेन गरयोगेन संहताः ॥६१॥ ब्रह्मराक्षसयोनिं च संप्राप्ता ब्राह्मणास्तथा ॥६१॥
रुद्राध्यायाभिषेकादीन् परार्थे च करोति यः ॥६२॥ तथापि काश्यां मरणं संप्राप्तो
नैव निष्कृतिः ॥ अनेकयुगपर्यंतं घोररूपां भयावहां ॥६३॥ रुद्रपैशाचिकीं

योनिं यातनां कालभैरवीं ॥ मूर्भैरा सालभते चैव कल्पकोटिशतैरपि ॥ ६४ ॥ सायुज्यं
समवाप्नोति कालभैरवशासनात् ॥ काश्यां मरणमापन्नः पापिष्ठो नैव जन्मभा
क् ॥ ६५ ॥ देहांते मुक्तिमाप्नोति विश्वेश्वरस्य प्रभावतः ॥ पुत्रदारधनादीनि तथाचा
सेवेपुस्तथा ॥ ६६ ॥ परार्थं दातुमप्येव शक्यं रुद्रजपार्जितं ॥ नैव शक्यं प्रदातुं वै
सदा कल्याणमर्थिना ॥ ६७ ॥ एतस्मिन्विषये पूर्वमितिहासं प्रवर्त्तितुं ॥ श्रूयं स
र्वैर्मुनिवराय च्छ्रुत्वा विस्मयं गताः ॥ ६८ ॥ अतस्तत्कथयिष्यामि शृणुध्वं सावु
धानतः ॥ पुरा धननिधिर्नाम्ना विख्यातः क्षत्रियस्ततः ॥ ६९ ॥ हिमाचलश्रृंग
देशे तपश्चक्रे मुनीश्वराः ॥ शिवलिंगं समास्थाय भस्मरुद्राक्षभूषितः ॥ ७० ॥
शिवनामपरो नित्यं शिवपूजापरायणः ॥ रुद्राध्यायजपासक्तः शैवानामग्रणीस्ततः ॥ ॥७१॥
शिवप्रसादात्संप्राप्तो धनानि विपुलानि च ॥ गजाश्वादीनि रत्नानि सार्वभौमा

धिपं तथा ॥ ७२ ॥ श्रुतिस्मृतमुखाविद्याश्चतुर्दशाचसंख्यकाः ॥ लब्धवान्सर्वधर्मज्ञो वदा
न्योगतकल्मषः ॥ ७३ ॥ असंख्यातधनं चैव गजाश्वादि नराधिपः ॥ गृहीत्वा सत्वरं का
शीं विश्वेशनगरीं तथा ॥ ७४ ॥ संप्रस्थितः सधर्मात्मा दृष्ट्वा विश्वेश्वरालयं ॥ पूजयामास वि
श्वेशं भक्त्या परमया मुदा ॥ ७५ ॥ तं द्रष्टुकामा देवेशं ब्राह्मणा वीतकल्मषाः ॥ दृष्ट्वा ता
नागतान् विप्रान् हृष्टो धननिधिस्तदा ॥ ७६ ॥ उवाच वचनं चारु सर्वदातिथिपूजकः ॥
यूयं सर्वे द्विजवरा दिष्ट्याच मिलितास्तदा ॥ ७७ ॥ न्यासपूर्वं महारौद्रमभिषेकं
प्रयत्नतः ॥ प्रकुर्वंतो भवंतोपि विश्वेशाय मुदान्विताः ॥ ७८ ॥ कृत्स्नं मम धनं चैव
गृह्णंतु मुनिपुंगवाः ॥ इति तद्वचनं श्रुत्वा सर्वे ते द्विजसत्तमाः ॥ ७९ ॥ धिक्कृते धनम
नोषंच घराट्कसदृशं भवेत् ॥ परार्थं रुद्रजाप्यंच ये कुर्वंति द्विजाधमाः ॥ ८० ॥
रुद्रपैशाचिकीं योनिं प्राप्नुवंति युगे युगे ॥ ब्रह्मराक्षसवेतालाः कालभैरव

स्यासनात्॥ ८१॥ कल्पांते निष्कृतिर्नैव भवेत्तेषां नराधिप॥ बहुजन्मांतरैः पुण्यैः
काशीं प्राप्य मलतः॥ ८२॥ अत्र ये [illegible]हिता विप्राः पुरार्थं रुद्रसूक्ततः॥ कृत्वा रुद्राभि
षेकं च लभंते मेरुसंनिभं॥ ८३॥ धनं बहुविधं चैव मूढात्मानो ह्यबुद्धयः॥ निधिं
हस्तगतं त्यक्त्वा चिन्वंति प्रस्तराण्यहो॥ ८४॥ रुद्रजाप्यस्य महिमा ज्ञातुं केन
चन्नु शक्यते। ब्रह्मणा विष्णुना वापि शक्रेणापि सुरैरपि॥ ८५॥ न ज्ञायते मु
निवरैर्नरैरद्यतनैरपि॥ रुद्रन्यासविधानं हि महिमानं सदाशिवः॥ ८६॥ भगवा
न् जगदाराध्यो जानाति स्वयमेव हि। अतोऽस्माभिर्न क्रियते सर्वथैव बहुराशया॥
॥ ८७॥ मुमुक्षुभिर्वीतरागैः प्रशांतैः पापभीरुभिः॥ इत्युक्त्वा ते समुत्तस्थुः सर्व
धर्मविशारदाः॥ ८८॥ ततो धननिधिश्चासौ स्वकीयं धनमुत्तमं॥ निकटेऽसौ स्था
पयित्वा चेतश्चिंतापरोऽभवत्॥ ८९॥ न्यायेनार्जितवित्ताय महतो यत्नत

ग

स्तथा॥ समानीताय चैतस्मै मद्रीयाय महीपते॥१०॥ पात्रं भवेन्नैव कोपि व्यर्थमि
च्छति वान्यथा॥ इतिश्रुत्वा चाडुः रवितश्च रुरोदोच्चैर्भर्त्सौ नरा॥११॥ कस्मैमस्त
मार्गैतो विप्रश्च सदेशं वेदपारगः॥ उवाच वचनं श्रीसा सांतयित्वाथ तं नृपं॥१२॥
माचिंतां कुरु भूपाल सिद्धिं नेष्याम्यहं पुनः॥ इतिश्रुत्वा वचस्तस्य हृष्टोऽभून्नृ
पनंदनः॥१३॥ भत्स्यवोच धननिधिस्तं विप्रं मुनिसत्तमाः॥ शृणु विप्र महाभाग
वायुवेगपुरोगमाः॥१४॥ उत्तमाश्चाइमे कोटियुतसंख्या गजास्तथा॥ चतुर्लक्ष
मिताश्चैव कोटिसंख्या रथास्तथा॥१५॥ दासीदास्याद्यनेकाश्च तथा गोवृष
भादिकः॥ असंख्याताश्च रत्नानि धनानि विविधानि च॥१६॥ मेरुतुल्याश्चि
मो विप्र (शि) वार्थे कल्पितानि वा॥ अतिरुद्रं महारुद्रं लघुरुद्रं मया पिवा॥

कारयित्वार्थमेतच्च गृहाणोत्तम मादरात् ।। सर्वस्वं दीयते तुभ्यं मयेतन्नात्र संशयः ।।
इत्याकर्ण्य वचस्तस्य पुनराह द्विजस्तदा ।। रुद्रजाप्यस्य महिमा ब्रह्माद्यैर्ज्ञायते न
हि ।। ९९ ।। तथापि सहस्रावर्त्यैतमभिषेके तदर्थतः ।। करिष्यामि च नेष्यामि त्व
द्धनं कृत्स्नमेवाहि ।।१००।। तथेत्याह पुनर्भूपो हृष्टः परमया मुदा ।। कृतार्थोस्मी
ति बहुशो मेने स्वात्मनि पुण्यकृत्तर ।।१।। मणिकर्णं समासाद्य प्रातः स्ना
त्वा यथाविधि ।। शुक्लवासा धननिधिर्विश्वेशालयमागतः ।।२।। उपचारैश्च
तुश्चत्वारिंशत्संख्यैश्च सादरं ।। पूजाभिश्च सुसंरब्धैरत्युत्सव मनोरमैः ।।
गीतवादित्रनादैश्च तद्विप्रेण समं नृपः ।। रुद्राभिषेकमखिलं सकलं दाव
र्त्यपूर्वकं ।।३।। पूजयामास तं देवं विश्वेशं च महेश्वरं ।। शिवार्थं कल्पितं पञ्च

सर्वस्वधनमुत्तमं ॥५॥ ददौ तस्मै द्विजायाथ सगजाश्वादिकं बहु ॥ ततो धननिधिः का
श्यां ~~धर्मसिद्धं प्राप्य परस्त्र हार्दः~~ ॥ मल्पैरेव दिनैर्मृतः ॥ अवाप्य शिवसायुज्यं शिवस्य वप्र
सादतः ॥ द्विजोपि स धनग्राही ततः संतप्तमानसः ॥७॥ वसिष्ठं ऋषिं प्रत्याह कृतां
जलिपुटो वचः ॥ परार्थं धनलोभेन रुद्रजाप्यः कृतो मया ॥८॥ तस्मात्संचितपा
पानां विनाशायिषया मुने ॥ भवच्छरणमापन्नो निष्कृतिं वद सांप्रतं ॥९॥ इति पृ
ष्टो वसिष्ठस्तं प्रत्युवाचार्थवित् मुनिः ॥ त्वयाद्यापि कृतं कर्म गर्हितं सर्वकर्मसु ॥१०॥
सर्वेषां चैव पापानां निष्कृतिर्भवति ध्रुवं ॥ परार्थरुद्रजापेन विप्रपन्नं किल्बिषं मह
त् ॥११॥ तस्य नोक्तानि निष्कृतिश्च श्रुतिभिः स्मृतिभिस्तथा ॥ येन रुद्रो ध्यायजपः सकृ
न्मात्रः कृतः शिव ॥१२॥ ~~तस्यनोक्तानि~~ तेन सांगोपांगवेदोऽधीतः सर्वयज्ञैः कृताः ॥
सर्वतीर्थेषु सुस्नातः सर्वदानफलं लभेत् ॥१३॥ इत्यादिफ माहात्म्ये प्राकृः केवल्यवा

दिनः॥ तदेतन्महिमानंचजानात्येवस्वयंहरः॥१४॥ लज्जपाचारितं पापं परार्थंधनलोभ
तः॥ ब्रह्मराक्षसयोनिंच भजते नात्रसंशयः॥१५॥ नदानेनतपोभिश्चनयज्ञैस्तीर्थ
सेवनैः॥ नवेदाध्ययनैश्चापिसांगोपांगैर्द्विजाधम॥१६॥ नाशमायातितत्पापं
सत्यं सत्यं नसंशयः॥ धिक्कू धिक्कू मूढत्वयाचाघवृथाजीवितमेवच॥१७॥ इतिभि
५२ र्त्सयित्वाथवसिष्ठो मुनिसत्तमः॥ स्नात्वासचैलंकृतात्मापंचाक्षरमनुंजपन्॥
तंदृष्ट्वा मुनयः सर्वेविनिंदेयुर्द्विजाधमं॥ सोपिविप्रोबहुधनंतदुपार्जितमेवय
त्॥१९॥ किंचित्कालंविभुज्याथपंचत्वमगमत्ततः॥ रुद्रैपैशाचिकींयोनिंभुक्त्वादि ५२
वै व्यसहस्रकं॥२०॥ यातनांघोररूपांचकालभैरवशासनात्॥ संप्राप्तश्चपुनश्चासौ
संबंधंचरस्तोद्दंडपाणिना॥ एवंबहुतिथेकालेसविप्रोदुःखितोभृशं॥ विश्वेशानुग्र
हादेवमुक्तोऽभूद्दिव्यरूपधृक्॥२२॥ अतस्तपोधनास्तेचसप्तविप्राःस्वचक्रतः॥
ब्रह्मराक्षसयोनिंचसमासाद्यैवपापतः॥२३॥ अद्यापिमानुषबलिग्रण्ह ८

```
[OrderDescription]
,CREATED=05.10.19 12:32
,TRANSFERRED=2019/10/05 at 12:45:25
,PAGES=103
,TYPE=STD
,NAME=S0001977
,Book Name=M-477-SAHYADIKHAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
```

```
FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
```

```
FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
```

```
FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
```

```
FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
```

```
FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
```

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

```
FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,
```